東洋文化研究所紀要　第167冊
平　成　27　年　3　月　抜　刷

# A Critical Edition of *Kāśikā* ad *Ślokavārttika apoha* vv. 2–94

Kei Kataoka

# A Critical Edition of *Kāśikā* ad *Ślokavārttika apoha* vv. 2–94

Kei KATAOKA

## 1. Manuscripts

Sucarita's lengthy commentary on a single verse (*Ślokavārttika apoha* v.1) was published as Kataoka 2014. The following is its continuation covering vv. 2–94. In preparing the present edition four manuscripts are consulted as in Kataoka 2014.

$A_1$ A manuscript preserved in the Adyar Library, Chennai, No. 38.G.5-5, 63359, TR 66-5. Paper. Devanāgarī. pp. 2651.8–2727.9. (TR 66-7, a manuscript of the same series, is designated by Shida as $T_A$.)

$G_1$ A manuscript preserved in the Government Oriental Manuscript Library (GOML), Chennai, R. 3778, S.R. 2126. Paper. Devanāgarī. pp. 407.4–442.6. (Designated as $T_G$ by Shida)

$K_1$ A manuscript preserved in the Oriental Research Institute & Manuscript Library (ORI), University of Kerala, C.O.L. No. 1333. Palm Leaf. Malayalam script. ff. 26r9–35r11. (Designated as $K_1$ by Shida)

$S_1$ A manuscript preserved in the Sarasvatī Bhavan Library, Varanasi, No. 29032. Paper. Devanāgarī. ff. 386v1–401v5. (Designated as S by Shida)

See Ōmae 1998, Shida 2013 and Kataoka 2014 for further information of these manuscripts.

## 2. Pratīka

Among the four manuscripts, three manuscripts quote the *mūla* text with *pratīka*s, i.e. only the first part of the passage in question referred to, whereas $K_1$ always quotes the entire passage in question from the *Ślokavārttika*. Which is Sucarita's original, *pratīka*s or the entire passages? The following examples suggest that quotes in the form of *pratīka*s are the original.[1]

5cd: *ata āha—na śābaleyeti. śābaleyavijñānaṃ nāgovyāvṛttinibandhanam.*
★ *na śābaleyeti*] $A_1G_1S_1$ ; *na śābaleyavijñānam agovyāvṛttibandhanam* $K_1$
★ *-vijñānaṃ*] $K_1$ ; *-vijñānaṃ hi* $A_1G_1S_1$ ★ *nāgo-*] $K_1S_1$ ; *nāpoha-* $A_1G_1$
★ *-vyāvṛttini-*] $A_1G_1K_1$ ; *-vyāvṛtter ni-* $S_1$

$K_1$, however, reads as follows:

*ata āha—na śābaleyavijñānam agovyāvṛttibandhanam. śābaleyavijñānaṃ nāgovyāvṛttinibandhanam.*

$K_1$ first quotes 5cd of the *Ślokavārttika*, and then glosses it in almost the same form. Only *ni-* is additional. Of course one could regard this gloss as a simple *anvaya* passage which just reorders the words in a more natural sequence in order to clarify the subject and the predicate. If Sucarita quoted the entire

1　I prefer the reading without *hi*. The immediately following passage, *tad dhi goviśeṣān eva bāhuleyādīn apohata iti*, has *hi*. This suggests that the preceding passage is a proposition supported by the following passage with *hi* that gives the reason. Then the first *hi* is not necessary. I guess it is a later insertion. As for the minor difference between *-vyāvṛttini-* and *-vyāvṛtter ni-*, I prefer the former, because I guess the latter is a later modification by a scribe who wants to clarify the type of the compound of the original word *agovyāvṛtti-bandhanam* (5d) in the *Ślokavārttika*.

passage as $K_1$ does, however, his commentary would be too repetitive. If, on the other hand, Sucarita quotes the *mūla* passage with a *pratīka* only, then his gloss in almost the same form makes better sense. A similar case is found in 26cd:

> *ataḥ siddhaṃ brāhmaṇatvād apetaṃ naratvam abrāhmaṇapadavācyam avatiṣṭhata ity āha — brāhmaṇatvād iti.*
> ★ *brāhmaṇatvād iti*] $A_1G_1$ ; *brāhmaṇatvād ato 'petaṃ naratvam avaśiṣyate* $K_1$ ; *brāhmaṇatvādīti* $S_1$

If we followed $K_1$, Sucarita's commentary would again be too repetitive as follows:

> *ataḥ siddhaṃ brāhmaṇatvād apetaṃ naratvam abrāhmaṇapadavācyam avatiṣṭhata ity āha — brāhmaṇatvād ato 'petaṃ naratvam avaśiṣyate iti.*

Although two words are added and *avaśiṣyate* is glossed as *avatiṣṭhate*, one cannot deny the feeling that quoting the entire passage is redundant. Another similar example is found in 89ab. (Irrelevant variants are omitted here.)

> *na ceti. anyarūpaṃ viśeṣaṇam anyādṛśaṃ jñānaṃ na karotīty arthaḥ.*
> ★ *na ceti*] $A_1G_1S_1$; *na cānyarūpam anyādṛk kuryāt jñānaṃ viśeṣaṇam* $K_1$

If we follow $K_1$, the reading runs as follows:

> *na cānyarūpam anyādṛk kuryāt jñānaṃ viśeṣaṇam. anyarūpaṃ viśeṣaṇam anyādṛśaṃ jñānaṃ na karotīty arthaḥ.*

According to $K_1$'s reading, Sucarita's gloss just changes the word-order with minor paraphrastic expressions such as *anyādṛśaṃ* for *anyādṛk* and *karoti* for *kuryāt*. One cannot but feel redundancy. Sucarita's last words "*ity arthaḥ*" would look inappropriate if he just reordered the same words.

It is of course not the case that Sucarita does not gloss a *mūla* passage with a simple *anvaya* reordering. See, for example, Sucarita's simple *anvaya* with additional explanation at 20abc:

ŚV: *śabdasāmarthyabhedena varṇeṣu matibhinnatā puṃstve tricaturādhāre/*

*Kāśikā*: *brāhmaṇādivarṇaviṣaye tricaturādhāre puṃstve śabdasāmarthyabhedena matibhinnatā buddhibhedo na nopapanna iti.*

In this case, however, there are additional phrases that explain the target sentence.

## 3. Peculiarity of Sucarita's pratīka: X iti Y-antena

When quoting ŚV passages in irregular forms, i.e. not *pāda* ab or abcd but only *pāda* abc or bc, for example, Sucarita marks his quotes with the formular X *iti* Y-*antena* in order to clarify the extent of the *mūla* passage commented upon.

9bc: *vyāsajyety eṣāmantena.*
★ *vyāsajyety eṣāmantena*] $A_1G_1S_1$ ; *vyāsajyaivaṃ prasajyate na pratyekaṃ bhaved eṣām* $K_1$

16abc: *kaiścid iti trayasyāntena.*
★ *kaiścid iti trayasyāntena*] $A_1G_1S_1$ ; *kaiścit tatraikaśabdatvam akṣādiṣv iva kalpitam jātitrayasya* $K_1$

See also 18abcd, 67abc, 72abc and 82abc. A peculiar feature is his way of quoting with only a single syllable.

20abc: *śabdeti re'ntena.*
★ *śabdeti re'ntena*] $A_1G_1$ ; *śabdasāmarthyabhedena varṇeṣu matibhinnatā*

*puṃstve tricaturādhāre* $K_1$ ; *śabdety ādhārentena* $S_1$

Similar cases are found in other portions of the *Kāśikā* (which will be edited in the next edition).

> 128abc: *bhedā iti bhyāmantena.*
> 154cd–155a: *sāmānyeti rontena.*
> 157a: *puruṣasyeti jñāntena.*

## 4. Corrections to Kataoka 2014

1. Kataoka 2014:352(11).8: *partivikalpaṃ* should be corrected to *prativikalpaṃ*.

2. Kataoka 2014:341(22) refers to the disputed date "898" of the *Nyāyasūcīnibandhana* (NSN) when considering Vācaspatimiśra's date in relation to Sucarita's. Taking into consideration the following remark by Muroya 2011, however, the consideration of the date is not necessary, because the authenticity of NSN as being composed by Vācaspatimiśra I is doubtful.

> Muroya 2006:23: Under this assumption, inasmuch as the printed NSN regards the relevant relationship as *upodghāta*, strong doubt is thrown upon the antiquity of the work, resulting from the alleged authorship of Vācaspati Miśra I.

According to NSN, a set of *sūtra*s are regarded as the *upodghāta* to another set of *sūtra*s. This interpretation, however, is not found in the earlier period. Udayana, for example, regards it as a *prasaṅga*. In other words, the interpretation found in NSN belongs to the later period, probably later than Keśava Miśra, who still supports the *prasaṅga*-interpretation. Thus, the author of NSN cannot be Vācaspatimiśra I. Therefore, one does not need to take into consideration the date found in the colophon of a manuscript of NSN when considering the date of

Vācaspatimiśra I.

3. Kataoka 2014:342(21) refers to the fact that Jñānaśrīmitra refers to Vācaspatimiśra and simply places Vācaspatimiśra before Jñānaśrīmitra (1000-1050). According to Muroya 2011, however, the situation is a bit more complicated.

> Muroya 2011:359: If these two assumptions were the case, they would provide an indication of the following chronological sequence: first the NBhūṣ and the NKaṇ, then the AhVA, and finally the NVTṬ.

One needs to take into consideration the time-gap between Vācaspatimiśra's two works, i.e. the *Nyāyakaṇikā* (NKaṇ), his earliest work, and the *Nyāyavārttikatātparyaṭīkā* (NVTṬ). According to Muroya's observations, Jñānaśrīmitra's *Ahetukavināśādhikāra* (AhVA) criticizes the view found in the *Nyāyakaṇikā*. Jñānaśrīmitra's criticism probably leads Vācaspatimiśra to add a new argument in the NVTṬ. It is also well known that Jñānaśrīmitra in other chapters, e.g. *Apoha*, criticizes Vācaspatimiśra's NVTṬ. Thus, taking into consideration all pieces of evidence, one can draw a chronological chart as follows:

Vācaspatimiśra (NKaṇ)　　Bhāsarvajña (NBhūṣ)<br>
↓　　↙<br>
Jñānaśrīmitra (AhVA)<br>
↓<br>
Vācaspatimiśra (NVTṬ)<br>
↓<br>
Jñānaśrīmitra (*Apoha*)

## Acknowledgments

I thank Kunio Harikai, Futoshi Ōmae and Taisei Shida for their help in obtaining

copies of manuscripts. I am indebted to the following libraries and institutes for giving me permission to consult manuscripts: the Adyar Library, Chennai; the Government Oriental Manuscript Library, Chennai; the Oriental Research Institute & Manuscript Library, University of Kerala; the Sarasvatī Bhavan Library, Varanasi. The complex typesetting of the present edition is made possible thanks to the EDMAC macros developed by John Lavagnino and Dominik Wujastyk.

## Bibliography

See the bibliography in Kataoka 2014 for other references.

Kataoka, Kei（片岡　啓）

2014 “Sucaritamiśra’s Critique of *Apoha*: A Critical Edition of *Kāśikā* ad *Ślokavārttika apoha* v. 1.” *The Memoirs of Institute for Advanced Studies on Asia*, 165, 362(1)–289(74).

Muroya, Yasutaka（室屋 安孝）

2006 “Apropos the *Nyāyasūcīnibandha*: Some historical problems and the manuscript transmission of the *Nyāyasūtra*.” *Journal of the Ganganatha Jha Kendriya Sanskrit Vidyapeetha*, 62, 405–432.

2011 “Bhāsarvajña’s interpretation of *bhāva eva nāśaḥ* and a related chronological problem.” In: *Religion and Logic in Buddhist Philosophical Analysis. Proceedings of the Fourth International Dharmakīrti Conference*, Vienna, August 23-27, 2005, edited by Helmut Krasser, Horst Lasic, Eli Franco, Birgit Kellner, 341–361.

# काशिका
## सुचरितमिश्रकृता।
### अपोहवादः।

2ab

संग्रहोक्तमर्थमतः परं प्रपञ्चयिष्यन् स्वतन्त्राभावप्रतीतिस्तावन्नास्तीति पूर्वोक्तमेव स्मारयति—भावान्तरमिति।

2cd

न च परेषां मते भावान्तरमपोहाश्रयतया शक्यं दर्शयितुमित्यभिप्रायेणाह—तत्रेति। एवं हि मन्यते। न तावद् भवत्सिद्धान्ते ऽभावो नाम किमपि तत्त्वान्तरमस्ति यो ऽपोहापरनामा शब्दानामर्थो भवेत्।

यदि त्वस्मत्सिद्धान्तानुसारेणाभावस्तत्त्वान्तरमवसीयते, ततो ऽवश्यमस्याश्रयभूतं वस्तुरूपमेव सामान्यमनेकपिण्डानुगतं किंचिदभ्युपगमनीयम्, वस्त्ववष्टम्भशून्याया अन्यनिवृत्तेरनवगमात्, असाधारणस्य चाव्यपदेश्यत्वेनाशब्दविषयत्वात्, शाबलेयादिभेदानां चासामान्यवचनत्वापत्तेरिति।

**2** °मतः परं ] $A_1G_1K_1$ ; °मतः $S_1$ **3** भावान्तरमिति ] $A_1G_1S_1$ ; भावान्तरमभावो हि पुरस्तात् प्रतिपादितः $K_1$ **5** परेषां ] $A_1G_1S_1$ ; पर° $K_1$ **6** तत्रेति ] $A_1G_1S_1$ ; तत्राश्वादिनिवृत्त्यात्माभावः क इति कथ्यतां $K_1$ **6** मन्यते ] $A_1G_1K_1$ ; मन्यन्ते $S_1$ **7** किमपि ] $A_1G_1$ ; om. $K_1$ ; किंचित् $S_1$ **7** शब्दा° ] $A_1G_1$ ; भवेत् शब्दा° $K_1^{ac}$ ; भवेत् गवादिशब्दा° $K_1^{pc}$ ; गवादिशब्दा° $S_1$ **9** त्व° ] $A_1G_1K_1$ ; चा° $S_1$ **9** °रेणा° ] $S_1$ ; °रेण चा° $A_1G_1K_1$ **9** °मवसीयते ] $A_1G_1$ ; °मभिधीयते $K_1$ ; °माश्रीयेत $S_1$ **11** वस्त्ववष्टम्भ° ] $A_1G_1$ ; वस्त्ववष्टंभन° $K_1$ ; वस्तुस्वरूप° $S_1$ **11** °शून्याया अन्य° ] $K_1S_1$ ; °शून्यायास्त्वन्य° $A_1G_1$ **12** असाधारणस्य ] $A_1G_1S_1$ ; असाधरणस्य $K_1$ **12** °विषयत्वात् ] $A_1G_1K_1^{pc}S_1$ ; °विषयत्वात् कल्पनापोढप्रत्यक्षमात्र $K_1^{ac}$ **13** चा° ] $K_1S_1$ ; च $A_1G_1$ **13** °त्तेरिति ] $A_1G_1$ ; °त्तेरित्यनन्तरमेव वक्ष्यत इति $K_1$ ; °त्तेरित्यनन्तरमेव वक्ष्यतीति $S_1$

3ab

स्यादेतत्। असाधारण एवार्थात्माश्वादिनिवृत्त्यात्मना प्रतीयत इति। तन्न, तस्य विकल्पाविषयत्वात्। कल्पनापोढप्रत्यक्षमात्रविषयो ह्यसाविष्टः, कथं सविकल्पकज्ञानविषयो भवेदित्याह—नेष्ट इति।

3cd

ये ऽपि चामी सामान्यविशेषास् ते सत्यपि विकल्पविषयत्वे नास्या गवादिबुद्धेरालम्बनम्, असामान्यप्रसङ्गात्। सकलशाबलेयाद्यनुगतं हि गोत्वादि तेषां सामान्यं भवेत्। शाबलेयाद्यन्यतमपर्यवसितं तु कथं सामान्यम्। तथा हि तद्यदि शाबलेयस्यात्मा, न तर्हि बाहुलेयस्य, इतरथा वा नेतरस्येत्यभिप्रायेणाह—तथेति।

4ab

एवमपि सामान्यरूपता भवेत्, यदि शाबलेयादिरूपमेव बाहुलेयादीनां परस्परं साधारणं भवेत्। न त्वेवम्। व्यावृत्तो हि शाबलेयात्मा बाहुलेयादित्यभिप्रायेणाह—शाबलेयादीति।

4c

न च सकलशाबलेयाद्यनुगतमस्माकमिव गोत्वमितरेषां बौद्धानामस्ति यदगोव्यावृत्त्यात्मना गृह्यत इत्याह—न चैकमितरेषामिति।

4cd

---

**2** एवार्थात्मा° ] $A_1G_1K_1$; एवात्मा° $S_1$ **2** प्रतीयत ] $A_1G_1K_1$; ग्रहिष्यत $S_1$ **3** तस्य विकल्पा° ] $A_1G_1$; तस्याविकल्प° $K_1S_1$ **4** सविकल्पक° ] $A_1G_1K_1$; सविकल्प° $S_1^{ac}$; विकल्प° $S_1^{pc}$ **4** नेष्ट इति ] $A_1G_1S_1$; नेष्टो साधारणस्तावद्विशेषो निर्विकल्पनात् $K_1$ **6** चामी ] $A_1G_1$; चामी शाबलेयादि° $K_1S_1$ **6** विकल्पविषयत्वे ] $A_1G_1K_1$; विकल्पाविषयत्वे $S_1$ **8** गोत्वादि ] $A_1G_1$; गवादि $K_1S_1$ **9** न ] $K_1S_1$; °नं $A_1G_1$ **10** इतरथा वा नेतर° ] $G_1^{pc}K_1$; इतरथापानेतर° $A_1G_1^{ac}$; इतरथा च नेतर° $S_1$ **10** तथेति ] $A_1G_1S_1$; तथा च शाबलेयादिरसामान्यप्रसंगतः $K_1$ **13** परस्परं ] $A_1G_1$; परस्पर° $K_1S_1$ **14** शाबलेयादीति ] $A_1G_1S_1$; शाबलेयादिरूपं हि न सामान्यं परस्परम् $K_1$ **16** सकल° ] $A_1G_1K_1$; om. $S_1$ **17** न चैकमितरेषामिति ] $A_1G_1S_1$; न चैकमितरेषां $K_1$

एवं चानुगतैकवाच्यासंभवात् प्रतिपिण्डं वर्तमानस्य गवादिशब्दस्यानन्तार्थतैव भवेत्। न च सा संभवति, अनन्तैः संबन्धस्य गृहीतुमशक्यत्वाद् अगृहीतसंबन्धस्य चाप्रत्यायकत्वाद् इत्यभिप्रायेणाह—व इति।

5ab

इतश्च सामान्यविशेषः शाबलेयादिरगोव्यावृत्तेर्नालम्बनमित्याह—न चेति। अगोव्यावृत्त्यात्मना हि शाबलेयादिविशेषे गृह्यमाणे तस्यैवागावो ऽश्वादयो ऽपोह्या भवेयुः। न चैतद्युक्तमिति वक्ष्यमाणो ऽभिप्रायः। त इत्यश्वादय इत्यर्थः।

5cd

कथं न युक्तम्। अत आह—न शाबलेयेति। शाबलेयविज्ञानं नागोव्यावृत्तिनिबन्धनम्। तद्धि गोविशेषानेव बाहुलेयादीनपोहत इति वक्ष्यमाणो ऽभिप्राय इति।

6ab

अभिप्रायं विवृणोति—निवृत्त्येति।

6cd

---

**1** °तैक° ] $A_1G_1K_1$; °तैकरूप° $S_1$ **2** °स्यानन्तार्थतैव ] $A_1G_1K_1^{pc}S_1$; °स्यागक्तार्थतयैतव $K_1^{ac}$ **3** °स्य चा° ] $A_1G_1$; °स्या° $K_1$; °स्य च शब्दस्या° $S_1$ **4** व इति ] $A_1G_1S_1$; वस्तत्रानन्तार्थता भवेत् $K_1$ **6** °विशेषः ] $K_1S_1$; °विशेष° $A_1G_1$ **7** न चेति ] $A_1G_1S_1$; न च साक्षाद्विशेषस्य ते पोह्या इति युक्तिमान् $K_1^{ac}$; न च साक्षाद्विशेषस्य ते पोह्या इति युक्तिमत् $K_1^{pc}$ **7** अगोव्यावृत्त्या° ] $A_1G_1K_1$; अगोनिवृत्त्या° $S_1$ **8** न चैत° ] $A_1G_1$; च न त° $K_1$; न च त° $S_1$ **9** वक्ष्यमाणो ऽभिप्रायः ] $A_1G_1K_1^{pc}S_1$; om. $K_1^{ac}$ **11** युक्तम् ] $A_1G_1K_1$; युक्तमिति $S_1$ **11** न शाबलेयेति ] $A_1G_1S_1$; न शाबलेयविज्ञानमगोव्यावृत्तिबन्धनम् $K_1$ **11** °विज्ञानं ] $K_1$; °विज्ञानं हि $A_1G_1S_1$ **12** नागो° ] $K_1S_1$; नापोह° $A_1G_1$ **12** °व्यावृत्तिनि° ] $A_1G_1K_1$; °व्यावृत्तेर्नि° $S_1$ **12** गोविशेषा° ] $A_1G_1S_1$; तद्विशेषा° $K_1$ **13** वक्ष्यमाणो ऽभि° ] $A_1G_1K_1$; वक्ष्यमाण एवाभि° $S_1$ **15** निवृत्त्येति ] $A_1G_1S_1$; निवृत्त्या बाहुलेयादेस्तद्विज्ञानं प्रवर्त्तते $K_1$

यदि त्वगाव एव शाबलेयस्यापोह्या भवेयुः, एवं सति गवामेव बाहुलेयादीनामात्मन इव तेनापोहो न स्यादित्याह—कुर्यादिति।

7

यदि तूच्यते—शाबलेयस्य रूपद्वयम्, शाबलेयरूपं गोरूपं चेति। तदयं गोरूपेण न बाहुलेयादीनपोहते। स्वरूपेण तु शाबलेयात्मना तानप्यपोहत एवेति।

तदयुक्तम्। एवं सति युगपदेव गोशब्दाद् बाहुलेयादीनामाक्षेपो वारणं च भवेत्। गवात्मनाक्षेपो बाहुलेयात्मना वारणम्। एवं च सहासंभविनोरेकत्र समावेशाद् विरोधो भवेदित्याशङ्क्या सहाह—तेनेति।

8ab

अतः सिद्धम् असत्येकस्मिन्ननुगते रूपे न शाबलेयादीनां प्रात्या-

**6** The formula **यदि तूच्यते** ··· **तदयुक्तम्** is found, e.g., at *Kāśikā* ad *codanā* 92 (I 108.8–9): **यदि तूच्यते—असिद्धमेव नश्चोदनाप्रामाण्यम्। कथं तयाप्रामाण्यपक्षो बाध्यत इति। तदयुक्तम्।**

**1 शाबलेयस्या॰** ] $A_1G_1K_1$; **शाबलेयस्य त्व॰** $S_1$ **2 ॰मात्मन** ] $A_1G_1S_1$; **॰मत्मन** $K_1$ **2 कुर्यादिति** ] $A_1G_1S_1$; **कुर्यादगोनिवृत्तिं चेन्नापोहेतात्मतत्वद्धितान्** $K_1$(unmetrical) **4 रूप॰** ] $A_1G_1S_1$; **सरूप॰** $K_1$ **4 ॰द्वयम्** ] $K_1^{ac}S_1$; **॰द्वयमस्ति** $A_1G_1K_1^{pc}$ **4 गोरूपं चेति** ] $S_1$; **गोत्वरूपं च** $A_1G_1K_1$ **5 तदयं** ] $K_1S_1$; **तच्च** $A_1G_1$ **5 गोरूपेण** ] $A_1G_1K_1$; **गोरूण** $S_1$ **5 स्वरूपेण** ] $A_1G_1K_1$; **विशेषरूपेण** $S_1$ **5 तु** ] $A_1G_1S_1$; om. $K_1$ **6 एवेति। तदयुक्तम्** ] $A_1G_1$; **इति तदयुक्तम्** $K_1$; **एवेति** $S_1$ **7 बाहुलेया॰** ] $A_1G_1S_1$; **बाहुले॰** $K_1$ **8 वारणं च** ] $A_1G_1K_1^{pc}S_1$; **वारण** $K_1^{ac}$ **8 ॰त्मना वारणम्** ] $A_1K_1S_1$; **॰त्मनाक्षेपो बाहुलेयात्मना वारणम्** $G_1$ **8 एवं च** ] $A_1G_1K_1$; **एवं** $S_1$ **9 ॰त्र समावेशाद्** ] $K_1$; **॰त्रासमावेशाद्** $A_1G_1S_1$ **9 ॰शङ्क्या सहाह** ] $A_1G_1S_1$; **॰शंकाया साहाह** $K_1$ **10 तेनेति** ] $A_1G_1S_1$; **तेनांशेनानपोहश्च स्वरूपेणाप्यपोहनम् कल्प्यते चेद्विरोध स्यात् सममाक्षेपवारणे** $K_1$ **12 असत्येकस्मिन्ननुगते रूपे** ] $A_1G_1K_1$; **एकस्मिन्ननुगते रूपे ऽसति** $S_1$

त्मिकै रूपैरगोपोहो ऽवकल्पत इत्युपसंहरन्नाह—तस्मादिति।

8cd

न च वाच्यं शाबलेयादिसमुदाय एवागोव्यावृत्त्यात्मना गृह्यत इति। आह—समुदाय इति।

9a

अत्र कारणमाह—सर्वेति। समुदायालम्बनत्वे हि सर्वशाबलेयाद्युपलब्धावेवागोव्यावृत्तिबुद्धिर्भवेत्, निर्विषयाया व्यावृत्तेर्गृहीतुमशक्यत्वादिति।

9bc

समुदायालम्बनत्वे च व्यासङ्गिनी गोबुद्धिर्भवेत्, एकैकत्र समुदायस्यापरिसमाप्तत्वात्। प्रत्येकमेव च शाबलेयादिषु गोबुद्धिरुपजायमाना दृश्यते। तन्नोपपद्यत इत्याह—व्यासज्येत्येषामन्तेन।

9d

सर्वोपलब्धिश्च त्रिकालवर्तिनां सहासंभवादशक्येत्याह—नेति। अतो ऽवश्यमेषितव्यं सर्वपिण्डानामनुगतं प्रत्येकपरिनिष्ठितं रूपं गोबुद्धेर्निमित्तम्।

10

**1 प्रात्यात्मिकै** ] em.; प्रत्यात्मकै $A_1G_1K_1$; प्रत्यात्मिकै $S_1$ **1 इत्युपसंहरन्नाह** ] $A_1G_1$; इत्युपसंहरति $K_1S_1$ **1 तस्मादिति** ] $A_1G_1S_1$; तस्मात्प्रत्यात्मकै रूपैरगोपोहो न युज्यते $K_1$ **4 समुदाय इति** ] $A_1G_1S_1$; समुदायो पि नैतेषामगोव्यावृत्तिसम्मतम् $K_1^{ac}$; समुदायो पि नैतेषामगोव्यावृत्तिसम्मतः $K_1^{pc}$ **6 सर्वेति** ] $A_1G_1S_1$; सर्वोपलब्धौ तद्बुद्धिः $K_1$ **7 निर्विषयाया** ] $G_1K_1S_1$; निर्विषयाय $A_1$ **11 °त्र समुदाय°** ] $A_1G_1K_1$; °त्रासमुदाय° $S_1$ **11 °परिसमाप्तत्वात्** ] $A_1G_1K_1$; °समाप्तत्वात् $S_1$ **11 च** ] $A_1G_1K_1$; om. $S_1$ **12 व्यासज्येत्येषामन्तेन** ] $A_1G_1S_1$; व्यासज्यैवं प्रसज्यते न प्रत्येकं भवेदेषाम् $K_1$ **14 °वर्तिनां** ] $A_1G_1$; °परिवर्तिनीनाम् व्यक्तीनाम् $K_1$; °वर्तिनीनां $S_1$ **14 °संभवाद°** ] $A_1G_1S_1$; °संभवादेवा° $K_1$ **14 नेति** ] $A_1G_1S_1$; न समस्तेष्वशक्तितः $K_1$

न च गोत्वात् तद् अन्यद् दर्शयितुं शक्यम् इत्याह—तस्मादिति।

11ab

अत्र चोदयति—ननु चेति। अयमभिप्रायः। नावश्यं भावान्तरमेवापोहात्मना गृहीतव्यम्, मीमांसकस्यापि प्रागभावादौ तदसंभवात्। प्रागभावबुद्धिर्हि कारणदशायां कार्यस्य सर्वत्रैव क्षीरादौ जायमाना दृश्यते प्रत्येकमेव। न चास्याः साधारणमालम्बनं प्रत्येकपरिनिष्ठितं किंचिद्दर्शयितुं शक्यम्। क्षीरं हि दध्नः प्रागभावो नाज्यस्य। तस्य तु नवनीतं न दध्नः। प्रागभावबुद्धिस्तु द्वयोरपि साधारणी। तदीयमनाश्रित्यैव कंचिदेकं भावमुदीयमाना "नावश्यमभावधियो भावालम्बनत्वम्" इत्यावेदयति। अभावमात्रमेव तु स्वतन्त्रं द्वयोरपि समानम्, तद्वदेवागोव्यावृत्तिरप्यनुपाश्रितभावविशेषा किं नोपपद्यत इति भावः।

11cd

परिहरति—सत्तैवेति। मैवं वादीः। इहापि सकलक्षीरादिसाधारणी सत्तैवानुत्पत्त्यादिरूषिता सामान्यमालम्बनम्। प्रागभावधियो न स्वतन्त्रो ऽभावः। प्रध्वंसाभावे च क्षीरध्वंसरूषिता दधिसत्ता, नव-

**1** गोत्वात् तद् ] $A_1G_1K_1$; तद् गोत्वाद् $S_1$ **1** शक्यम् ] $K_1S_1$; शक्यत $A_1G_1$ **1** तस्मादिति ] $A_1G_1S_1$; तस्मात् सर्वेषु यद्रूपं प्रत्येकं परिनिष्ठितम् गोबुद्धिस् तन्निमित्ता स्यात् गोत्वादन्यच्च नास्ति तत् $K_1$ **3** ननु चेति ] $A_1G_1S_1$; ननु च प्रागभावादौ सामान्यं वस्तु नेष्यते $K_1$ **4** °मेवापोहात्मना ] $A_1G_1K_1^{pc}$; °मेवान्यापोहात्मना $K_1^{ac}S_1$ **5** प्रागभाव° ] $K_1S_1$; प्रागभावा $A_1G_1$ **7** हि ] $A_1G_1S_1$; om. $K_1$ **8** °बुद्धिस्तु द्वयोरपि ] $A_1G_1K_1$; °बुद्धिः तद्वयोरपि $S_1$ **9** °श्रित्यैव ] $A_1G_1K_1$; °दृत्यैव $S_1$ **9** कंचिदेकं ] $S_1$; किञ्चिदेकं $A_1G_1K_1$ **9** °मुदीयमाना ] $A_1G_1K_1$; °मुपजायमाना $S_1$ **10** तु ] $A_1G_1K_1^{pc}S_1$; om. $K_1^{ac}$ **11** समानम् ] $A_1G_1K_1$; सामान्यं $S_1$ **11** °रप्यनुपाश्रित° ] $K_1$; °रूपा अनाश्रित° $A_1G_1$; °रनुपाश्रित° $S_1$ **11** °विशेषा ] $A_1G_1K_1^{pc}S_1$; °विशेषो $K_1^{ac}$ **14** सत्तैवेति ] $A_1G_1$; सत्तैवं ह्यस्य सामान्यमनुत्पत्त्यादिरूषिताम् $K_1$; सत्तेति $S_1$ **15** °साधारणी ] $A_1G_1K_1$; °साधारणा $S_1$ **15** प्रागभावधियो ] $A_1G_1S_1$; प्रगभावादिधियो $K_1$ **16** क्षीरध्वंस° ] $A_1G_1S_1$; क्षीरप्रध्वंस° $K_1$

नीतध्वंसरूषिता चाज्यसत्ता सामान्यम् इत्यादिशब्देन दर्शितमिति।

12

कथं पुनः सत्तैवाभावात्मना गृह्यते। नन्वेवं सदसद्विवेको नोपपद्येत। अत आह—तामिति। उत्पत्तिस्थितिपरिणामेष्वनुस्यूतो भावः सत्तेति ज्ञायते। अन्यापोहानुविद्धस्त्वभावात्मनेति विवेक इति।

13ab

यत्र तर्हि घटादिषु साधारणमनित्यत्वमवगम्यते, तत्र किमालम्बनम्। न हि तत्र प्रत्येकसमवायिरूपमनुगतं किंचिदस्ति घटादीनां यदस्या बुद्धेरालम्बनं भवेत्। अतो नित्याभावमात्रमेवानित्यत्वम्। अत आह—अनित्यत्वमिति। न नित्याभावो ऽनित्यता, अत्रापि भावान्तरालम्बनत्वात्। अस्ति हि सर्वनश्वाराणां विनाशाख्यक्रियासामान्यम्। तदनित्यबुद्धेरालम्बनम्।

किं पुनरिदं विनाशाख्यक्रियासामान्यम्। सावयवेष्ववयवविभा-

---

**11** Cf. *Kāśikā* ad *nirālambana* 123cd–124ab (II 71.8): विनाशाख्यक्रियासामान्यं चानित्यत्वमिति विधिरूपप्रतिज्ञा दर्शयितव्येति।

---

**1** **नवनीतध्वंस°** ] $A_1G_1S_1$; **नवनीतप्रध्वंस°** $K_1$ **4** **नोपपद्येत** ] $A_1G_1S_1$; **नोपपद्यते** $K_1$ **4** **तामिति** ] $A_1G_1S_1$; **तामुत्पत्त्याद्यनुस्यूतां सत्तेति प्रतिजानते अन्यापोहानुविद्धा तु सैवाभावः प्रतीयते** $K_1$ **4** **उत्पत्तिस्थिति°** ] $K_1S_1$; **उत्पत्ति°** $A_1G_1$ **4** **°परिणामेष्व°** ] $A_1G_1$; **°परिणामादिष्व°** $K_1S_1$ **5** **ज्ञायते** ] $G_1K_1$; **जायेत** $A_1$; **प्रतिज्ञायते** $S_1$ **7** **यत्र तर्हि** ] $A_1G_1$; **अत्र तर्हि** $K_1$; **यत्तावद्** $S_1$ **7** **घटादिषु** ] $A_1G_1K_1$; **घटादि°** $S_1$ **7** **°मवगम्यते** ] $A_1G_1K_1$; **°मनुभूयते** $S_1$ **8** **तत्र** ] $A_1G_1S_1$; om. $K_1$ **8** **°रूपमनुगतं किंचिदस्ति** ] $S_1$; **°रूपमवगतं किंचिदस्ति** $A_1G_1$; **किञ्चिदनुगतं रूपमस्ति** $K_1$ **9** **यदस्या** ] $A_1G_1K_1$; **यत्तस्या** $S_1$ **9** **°वानित्यत्वम्** ] $A_1G_1S_1$; **°वात्रानित्यत्वम्** $K_1$ **10** **अनित्यत्वमिति** ] $A_1G_1S_1$; **अनित्यत्वं विनाशाख्यक्रियासामान्यमिष्यते** $K_1$ **10** **नित्याभावो** ] $A_1G_1S_1$; **नित्यताभावा** $K_1$ **11** **भावान्तरा°** ] $A_1G_1K_1$; **भावा°** $S_1$ **11** **°नश्वराणां** ] $A_1G_1K_1$; **°विनश्वराणां** $S_1$ **11** **विनाशाख्य°** ] em.; **विनाशाख्यं** $A_1G_1K_1S_1$ **12** **°बुद्धेरा°** ] $G_1K_1S_1$; **°बुद्धरा°** $A_1$ **13** **विनाशाख्य°** ] $A_1G_1K_1$; **विनाशाख्यं** $S_1$ **13** **°ष्व°** ] $S_1$; **°षु तावद°** $A_1G_1K_1$

गात्मकम्। अनवयवेषु बुद्धिसुखदुःखेच्छादिष्वात्मनः स्वरूपावस्थानम्। तयोरयमक्षादिवत्साधारणो ऽनित्यशब्दः। न चैतत्प्रकारद्वयातिरिक्तमस्ति प्रकारान्तरमनित्यस्य येनानन्त्यादनवधारणं शब्दार्थस्य भवेदिति।

13cd

अत्र चोदयति—अब्राह्मणत्वमिति। अस्ति खलु भिन्नेष्वेव क्षत्रियादिषु "अब्राह्मणो ऽयम्" इति प्रत्ययः। न चास्य भावालम्बनत्वम्, क्षत्रियाद्यनुगतस्य रूपस्याभावात्, क्षत्रियादीनां परस्परतो व्यावृत्तेरिति।

14a

न चात्रापि पुरुषत्वमालम्बनमिति वक्तव्यम्। चतस्रो हि तस्य ब्राह्मणाद्याः संस्थाः, तदालम्बनत्वे ब्राह्मणो ऽप्यब्राह्मणधिया गृह्येतेत्यभिप्रायेणाह—पुरुषत्वमिति।

14b

विशेषास्तु क्षत्रियादयो नाब्राह्मणशब्दादवगम्यन्ते, सामान्यावगमादित्यभिप्रायेणाह—विशेषेष्विति।

14cd

---

**1** अनवयवेषु ] $A_1G_1K_1$; अनवयवेषु तु $S_1$ **2** तयोरयम॰ ] $A_1G_1S_1$; तयोर॰ $K_1$ **3** ॰क्तमस्ति प्रकारान्तरम॰ ] $A_1G_1K_1$; ॰क्तं प्रकारांतरमस्त्य॰ $S_1$ **3** ॰नित्यस्य ] $A_1G_1$; ॰नित्यत्वस्य $K_1S_1$ **3** येनानन्त्याद॰ ] $A_1G_1K_1$; येनानन्या॰ $S_1$ **4** भवेदिति ] $K_1$; भवेत् $A_1G_1S_1$ **6** अब्राह्मणत्वमिति ] $A_1G_1S_1$; अब्राह्मणत्वं किं नु स्यात् भिन्नेषु क्षत्रियादिषु $K_1$ **8** क्षत्रियाद्य॰ ] $S_1$; क्षत्रियादाव॰ $A_1G_1$; क्षत्रियादेर॰ $K_1$ **8** ॰नुगतस्य ] $K_1S_1$; ॰नुगत॰ $A_1G_1$ **8** क्षत्रियादीनां ] $S_1$; क्षत्रियादीनाञ्च $A_1G_1K_1$ **11** चात्रापि ] $A_1G_1S_1$; चात्र $K_1$ **11** पुरुषत्वमालम्बनमिति ] $A_1G_1K_1$; पुरुषालंबनं $S_1$ **12** ऽप्यब्राह्मण॰ ] $A_1G_1S_1$; ब्राह्मण॰ $K_1$ **12** ॰धिया ] $A_1G_1K_1$; ॰धियालंवनत्वेन $S_1$ **13** पुरुषत्वमिति ] $A_1G_1S_1$; पुरुषत्वञ्चतुस्संस्थं $K_1$ **15** नाब्राह्मण॰ ] $K_1S_1$; नाब्राह्मणश् $A_1G_1$ **16** सामान्यावगमा॰ ] $A_1G_1K_1$; सामान्याननुगमा॰ $S_1$ **16** विशेषेष्विति ] $A_1G_1S_1$; विशेषेषु च नास्ति धीः $K_1$

न च क्षत्रियादिसमुदायालम्बन एवाब्राह्मणप्रत्ययः, एकैकत्र भावादित्याह—सामान्येति।

15ab

अतो ऽवश्यमब्राह्मणादिषु ब्राह्मणाभाव एव वस्तूपष्टम्भशून्य एव सामान्यमित्यापतितमित्याह—तेनेति।

15b

न च तत् स्वयमेव वस्त्वित्यङ्गीकृतं भवद्भिरपि। अवस्त्वात्मकं सामान्यमित्यभिप्रायेणाह—अवस्त्विति।

15cd

एवं गवादावपि वस्तूपष्टम्भशून्यैवागोव्यावृत्तिरस्तु गवादिधियामालम्बनम्। किं वस्त्वाकारसामान्यव्यसनेन। अत आह—गोत्वादाविति।

16abc

अत्रैकेषां मतेन परिहारमाह—कैश्चिदिति त्रयस्यान्तेन। यथा सत्यामप्येकस्यामाकृतौ बहूनां साधारणो ऽक्षशब्दः, एवमब्राह्मणशब्दो ऽपि क्षत्रियादिजातित्रयस्यैकः साधारणः। अतो ऽयमेकैकक्षत्रियादिभावालम्बन एवेति भावः।

16cd

---

**1** एवा° ] $A_1G_1K_1$; एवायम° $S_1$ **2** सामान्येति ] $A_1G_1S_1$; सामान्यप्रत्ययश्चैषु प्रत्येकमुपजायते $K_1$ **4** ब्राह्मणाभाव एव ] $A_1G_1K_1$; ब्राह्मणाद्यभावो $S_1$ **4** °पष्टम्भ° ] $A_1G_1S_1$; °पष्ठन° $K_1$ **4** °शून्य एव ] $A_1G_1S_1$; °शून्यम् $K_1$ **5** °मित्यापतितमित्याह ] $A_1G_1$; °मित्यापन्न्तमित्याह $K_1$; °मित्याह $S_1$ **5** तेनेति ] $A_1G_1S_1$; तेनात्र ब्राह्मणाभावस्सामान्यं स्यात् $K_1$ **7** °त्मकं ] $S_1$; °त्मकमेव $A_1G_1K_1$ **8** अवस्त्विति ] $A_1G_1$; अवस्तु तत् $K_1$; अवस्तुवदिति $S_1$ **10** °पष्टम्भ° ] $A_1G_1S_1$; °पष्टंभन° $K_1$ **11** °व्यसनेन। अत आह ] $S_1$; °ग्रहेणेत्याह $A_1G_1K_1$ **12** गोत्वादाविति ] $A_1G_1S_1$; गोत्वादावपि तेनैवं सामान्यप्रत्ययो भवेत् $K_1$ **14** अत्रैकेषां मतेन ] $A_1G_1K_1$; अत्र $S_1$ **14** कैश्चिदिति त्रयस्यान्तेन ] $A_1G_1S_1$; कैश्चित्तत्रैकशब्दत्वमक्षादिष्विव कल्पितम् जातित्रयस्य $K_1$ **17** एवेति भावः ] $A_1G_1K_1^{pc}S_1$; इति $K_1^{ac}$

अयं तु परिहारो न व्यापक इति दूषयति—नैवमिति।

17ab

असंभवे कारणमाह—नात्रेति। तिस्रो हि क्षत्रियादयो या जातयः परिच्छिन्नदेशकाला इति शक्यते ताभिरब्राह्मणशब्दस्य संबन्धो गृहीतुमिति साधारणशब्दत्वोपपत्तिः। अघटादिशब्दानां त्वनन्तभेदगोचराणां दुरधिगमः संबन्ध इति दुर्निरूपं साधारण्यमिति।

17cd

अतो विमुच्यास्य साधारणशब्दतामन्य एवात्र समाधिर्वाच्य इत्याह—तस्मादिति। ब्राह्मणेभ्यो व्यावृत्ताः क्षत्रियादित्रयानुगताः केचित् क्रियागुणा अब्राह्मणशब्दस्य प्रवृत्तौ हेतवः। के पुनस्ते। क्रियास्तावद् ब्राह्मणप्रणामादिकाः। गुणास्तु प्रतिग्रहनिवृत्त्यादयो धर्मभेदाः। अनन्यवर्तिनो ऽब्राह्मणवर्तिन इत्यर्थः।

18abcd

अव्यापकमघटादिषु। यथा हि ब्राह्मणावर्तिनः क्षत्रियादिष्वनुगताः शस्त्रधारणादयः सन्ति, तथा घटेभ्यो व्यावृत्ता वृक्षादिष्वनुगताः केचिन्न संभवन्ति। तस्मादेवं न वाच्यमिति समाधानान्तरमाह—

---

**1** नैवमिति ] $A_1G_1S_1$; नैतत्तु संभवत्यघटादिषु $K_1$ **3** नात्रेति ] $A_1G_1$; नात्र ह्यनन्तके भेदे साधारण्यन्निरूप्यते $K_1$; नान्यत्रेति $S_1$ **3** क्षत्रियादयो या ] $A_1G_1$; क्षत्रियादि॰ $K_1$; क्षत्रियाद्या $S_1$ **4** परिच्छिन्न॰ ] $K_1S_1$; परिच्छिन्नं $A_1G_1$ **4** ॰देशकाला ] $A_1G_1$; ॰देशा $K_1S_1$ **5** ॰शब्दत्वो॰ ] $A_1G_1S_1$; ॰शब्दस्यो॰ $K_1$ **8** विमुच्यास्य ] $A_1G_1$; विमुच्यैव $K_1$; विमुच्य $S_1$ **8** ॰मन्य एवात्र ] $A_1G_1$; ॰मन्यथैवात्र $K_1S_1$ **9** तस्मादिति ] $A_1G_1S_1$; तस्मात् क्रियागुणाः केचिद्धेतवो नन्यवर्त्तिनः $K_1$ **9** क्षत्रियादित्रयानुगताः ] $A_1G_1S_1$; क्षत्रियाद्यनुगता $K_1$ **10** केचित् ] $A_1G_1$; केचिदेव $K_1S_1$ **10** प्रवृत्तौ ] $A_1G_1S_1$; प्रवृत्ति॰ $K_1$ **11** क्रियास्ता॰ ] $A_1G_1K_1$; क्रिया ता॰ $S_1$ **11** ॰दिकाः ] $A_1G_1K_1$; ॰दिका $S_1$ **11** गुणास्तु ] $A_1G_1$; गुणाश्च $K_1S_1$ **14** अव्यापकमघटादिषु ] em.; व्यापकमघटादिषु $A_1G_1$; इदमप्यघटादिष्वव्यापकमेव तथा हि $K_1$; om. $S_1$ **14** यथा हि ··· तस्मादेवं ] $A_1G_1K_1$; om. $S_1$ **15** वृक्षादि॰ ] $A_1G_1$; घटादि॰ $K_1$ **16** संभवन्ति ] em.; संभवति $A_1G_1K_1$

पुरुषत्वमिति गम्यतेऽन्तेन। अस्यार्थः। ब्राह्मणशब्दसमभिव्याहृतेन नञा ब्राह्मणेभ्यो व्यावर्तितं पुरुषत्वमेव स्वभावाच्चातुर्वर्ण्यप्रसक्तमब्राह्मणशब्दादवगम्यते। तद्धि स्वभावाच्चतुरो ऽपि वर्णान् व्याप्नोति। नञस्तु स नाम महिमा यन्नरत्वं ब्राह्मणेभ्यो व्यावर्त्य त्रिष्ववस्थापयति। अतो ऽत्राप्येकमस्ति वस्त्वाकारं सामान्यमालम्बनमिति।

18d

अत्रैव दृष्टान्तमाह—अर्थादिभिरिति। यथैव “ब्राह्मणमानय, श्राद्धे भोजयितव्यः” इत्युक्ते ऽनुक्ते ऽपि विशेषे ऽर्थात् तदर्ह एवानीयते तद्विपरीतेभ्यो व्यावृत्तः। एवमिहापि ब्राह्मणेभ्यो व्यावृत्तं नञ्सामर्थ्यान् नरत्वमवगम्यते। आदिशब्देन संनिधानतो विशेषलाभमुपादत्ते। तच्चानेयादिषूक्तमिति।

---

**10** Cf. Sucarita's usage at *Kāśikā* ad *pratyakṣa* 22 (I 212.21–22): **आदिशब्देन धर्मसादृश्यमुपादत्ते। एतच्चोपरिष्टात् प्रपञ्चयिष्यत एवेति।**

**11** For Sucarita's usage of **विशेषलाभ**, see, e.g. *Kāśikā* ad *nirālambana* 2

---

**1 न वाच्यमिति समाधानान्तरमाह** ] $A_1G_1$ ; **वाच्यमित्याह** $K_1$ ; **समाधानान्तरमाह** $S_1$ **1 पुरुषत्वमिति गम्यतेऽन्तेन** ] $A_1G_1S_1$ ; **पुरुषत्वन्नञा ने चत ब्रामत् ब्राह्मणेभ्यो निवृत्तितः चातुर्वर्ण्यप्रसक्तं सत् गम्यते** $K_1$ **2 व्यावर्तितं** ] $A_1G_1S_1$ ; **व्यावृत्तितः** $K_1^{ac}$ ; **व्यावृत्तिनः** $K_1^{pc}$ **2 °च्चातुर्वर्ण्य°** ] $A_1G_1K_1$ ; **°च्चतुर्वर्ण°** $S_1$ **3 °गम्यते** ] $A_1G_1K_1$ ; **°गम्यत इति** $S_1$ **4 नञस्तु स नाम** ] $A_1G_1K_1^{pc}$ ; **नञस्तु स मान** $K_1^{ac}$ ; **स नञस्तु सताम** $S_1$ **4 महिमा यन्नरत्वं** ] $A_1G_1S_1$ ; **महि** +++++ $K_1$ **4 व्यावर्त्य** ] $A_1G_1K_1$ ; **व्यावृत्य** $S_1$ **5 त्रिष्ववस्थापयति** ] $A_1G_1K_1$ ; **त्रिष्वपि व्यावर्तयति** $S_1$ **5 °मस्ति वस्त्वाकारं** ] $A_1G_1$ ; **°मस्ति वस्त्वात्मकं** $K_1$ ; **°मस्त्येकाकारमेकं** $S_1$ **5 सामान्यमा°** ] $A_1G_1K_1$ ; **सामान्या°** $S_1$ **7 दृष्टान्तमाह** ] $A_1G_1K_1$ ; **दृष्टान्तान्तरमाह** $S_1$ **7 अर्थादिभिरिति** ] $S_1$ ; **अर्थादिति** $A_1G_1$ ; **अर्थादिर्यथा** $K_1$(unmetrical) **7 यथैव** ] $S_1$ ; **यथैव हि** $A_1G_1$ ; **यथा हि** $K_1$ **7 श्राद्धे** ] $A_1G_1K_1$ ; om. $S_1$ **8 भोजयितव्यः** ] $A_1G_1$ $K_1$ ; **भोजयितव्यं** $S_1$ **8 इत्युक्ते ऽनुक्ते** ] $A_1G_1K_1$ ; **इत्यनुक्ते** $S_1$ **8 ऽर्थात् तदर्ह एवानीयते** ] $K_1S_1$ ; **ऽर्थादर्ह एवानीयते** $A_1G_1$ **9 व्यावृत्तः** ] $A_1G_1K_1$ ; **व्यावृत्तम्** $S_1$ **9 व्यावृत्तं** ] $A_1G_1S_1$ ; **वृत्तं** $K_1$ **11 तच्चानेयादिषूक्तमिति** ] $A_1G_1$ ; **तच्चानेयादिषु वर्तितमिति** $K_1$ ; **तच्चाग्नेयादिषु वर्तितमिति** $S_1$

19

नञ्सामर्थ्यमेव विवृणोति—यद्यपीति। न च वाच्यम् “यद्यत्र नरत्वं वाच्यम्, एवं सति नरशब्दादिव यथास्वभावमेव तदवगमो न्याय्यः” इति, शब्दशक्तिवैचित्र्यात्। विचित्रा हि शब्दानां शक्तिः। एक एव ह्यर्थो ऽन्यथा गौरित्यतो भासते द्रव्यगुणभूतो ऽन्यथा स्वप्रधानं गोत्वमिति।

20abc

एवमिहापि शब्दशक्तिवैचित्र्यान्न नानोपलम्भो नरत्वस्यानुपपन्न इत्याह—शब्देति रेऽन्तेन। ब्राह्मणादिवर्णविषये त्रिचतुराधारे पुंस्त्वे शब्दसामर्थ्यभेदेन मतिभिन्नता बुद्धिभेदो न नोपपन्न इति।

20d

केन प्रकारेण पुनरियमुभाभ्यां मतिभिन्नता जन्यते। अत आह—पर्युदासेति। नञा हि ब्राह्मणत्वं पर्युदस्य नरत्वं बोध्यत इति तत्र

---

(II 28.15–16): यथा तावदरुणिम्नस्तृतीयाश्रुत्या क्रियाङ्गभावे सामान्यतो ऽवगते “अरुणया क्रीणाति” इति क्रियाविशेषलाभो वाक्यात्।; ad *śabda* 13 (III 105.23–24): अयं चाधिकारतो विशेषलाभो जैमिनेरप्यनुमतश्चोदनाशब्दमविशेषितं द्वितीये सूत्रे प्रयुङ्जानस्येत्याह—यथा चेति।

---

**2 नञ्सा॰** ] $A_1G_1K_1$ ; नञः सा॰ $S_1$ **2 यद्यपीति** ] $A_1G_1K_1$ ; यद्यप्यवान्तरा नास्ति त्रिषु जातिव्यवस्थिता नाञ्सामर्थ्यान्नरत्वन्तु त्र्याधारं सम्प्रतीयते $K_1$ **3 यथास्वभावमेव** ] $A_1G_1S_1$ ; यथास्वभाव $K_1$ **3 तदवगमो** ] $A_1G_1K_1$ ; तदपगमो $S_1$ **4 न्याय्यः” इति** ] $G_1K_1S_1$ ; न्यान्य इति $A_1$ **5 एक एव ह्यर्थो** ] $A_1G_1K_1$ ; एष एव त्वर्थो $S_1$ **5 भासते** ] $A_1G_1K_1$ ; ऽवभासते $S_1$ **5 ॰भूतो ऽन्यथा** ] $A_1G_1S_1$ ; ॰भूतम् अन्यथा $K_1$ **8 एवमिहापि** ] $A_1G_1K_1$ ; एवमपि $S_1$ **8 शब्दशक्ति॰** ] $A_1G_1K_1$ ; शक्ति॰ $S_1$ **8 नानोपलम्भो** ] $S_1$ ; नञोपलंभो $A_1G_1$ ; नानोपलाभो $K_1$ **9 शब्देति रेऽन्तेन** ] $A_1G_1$ ; शब्दसामर्थ्यभेदेन वर्णेषु मतिभिन्नता पुंस्त्वे त्रिचतुराधारे $K_1$ ; शब्देत्याधारेन्तेन $S_1$ **9 ब्राह्मणादि॰** ] $A_1G_1S_1$ ; ब्रह्मणादिव॰ $K_1$ **9 ॰वर्णविषये** ] $A_1G_1K_1$ ; ॰वर्णाधारे $S_1$ **12 पुनरियमु॰** ] $A_1G_1S_1$ ; पुनरुक्त॰ $K_1^{ac}$ ; पुनरु॰ $K_1^{pc}$ **12 जन्यते** ] $A_1G_1S_1$ ; जायते $K_1$ **13 पर्युदासेति** ] $A_1G_1S_1$ ; पर्युदासस्वरूपतः $K_1$

त्र्याधारमेव तदवगम्यते। नरशब्दात्तु स्वरूपतो नरत्वमवसीयते, नान्यपर्युदासेन। स्वरूपं तु तस्य चतुःसाधारणमेवेति तथैवावगम्यत इति।

21

भावान्तराणामपि चायं शक्तिवैचित्र्यकारितो ऽर्थक्रियाविशेषो दृष्ट एवेति नानेन शब्दानामुपालम्भ इत्याह—दूरेति। यथा खलु चक्षुष्ट्वाविशेषे ऽपि गृध्रवायसचक्षुषोर्यथाक्रमं दूरान्तिकदर्शने सामर्थ्यं रूपविषये, एवं पुंस्त्वे ऽपि पुमब्राह्मणशब्दयोर् महाल्पविषयत्वे सामर्थ्यमिति।

22

अतः स नाम शक्तिविशेषो ऽब्राह्मणशब्दस्य येन वाक्यार्थ एवाब्राह्मणपदं वर्तते। दृष्टा च वाक्यार्थे वृत्तिस्थानां पदानां वृत्तिः, यथौपगवादीनाम्। अतो ऽब्राह्मणपदमपि “ब्राह्मणव्यतिरिक्तार्थवृत्ति पुंस्त्वम्” इतीदृशं वाक्यं यत्र तत्र प्रवर्तते। तज्जनिता च बुद्धिस्तमेवार्थं गोचरयति। तदेतदाह—ब्राह्मणेति।

23

---

**1** तत्र त्र्या° ] $A_1G_1$; ततस्त्र्या° $K_1$; ततस्त्या° $S_1$ **1** °वसीयते ] $A_1G_1S_1$; °वगम्यते $K_1$ **2** °पर्युदासेन ] $A_1G_1$; °पर्युदास इति $K_1$; °पर्युदासः $S_1$ **2** तु ] $A_1G_1K_1$; च $S_1$ **5** °कारितो ] $A_1G_1K_1$; °कारणतो $S_1$ **5** ऽर्थक्रिया° ] $K_1S_1$; र्थक्रियाकार° $A_1G_1$ **6** दूरेति ] $A_1G_1S_1$; दूरान्तिकेक्षणे शक्ति गृध्रवायसचक्षुषे यथा रूपे तथा पुंस्त्वे पुमब्राह्मणशब्दयोः $K_1$ **7** चक्षुष्ट्वाविशेषे ] $K_1S_1$; चक्षुषा विशेषे $A_1G_1$ **7** ऽपि ] $A_1G_1K_1$; वि $S_1$ **7** दूरान्तिकदर्शने ] $A_1G_1S_1$; दूरान्तिके दर्शन° $K_1^{ac}$; दूरान्तिकदर्शन° $K_1^{pc}$ **8** ऽपि ] $A_1G_1S_1$; om. $K_1$ **8** पुम° ] $K_1S_1$; पुं° $A_1G_1$ **8** °ल्पविषयत्वे ] $A_1G_1K_1$; °ल्पविषये $S_1$ **12** च ] $A_1G_1K_1$; om. $S_1$ **13** अतो ऽ° ] $G_1K_1S_1$; अत्रा° $A_1$ **13** °क्तार्थ° ] $A_1G_1K_1S_1^{pc}$; °क्तार्थविषय° $S_1^{ac}$ **14** पुंस्त्वम्” इती° ] $A_1G_1S_1$; पुंस्त्वमि° $K_1$ **14** °दृशं वाक्यं यत्र तत्र प्रवर्तते ] $A_1G_1$; °दृशं वाक्यं यत्र तत्र वर्तते $K_1$; °दृशस्य वाक्यस्यार्थे वर्तते $S_1$ **15** ब्राह्मणेति ] $A_1G_1S_1$; ब्राह्मणव्यतिरिक्तार्थवृत्ति पुंस्त्वमिदृशम् $K_1$(unmetrical)

एवमेवाघटादिशब्दानामपि घटत्वादिविनिर्मुक्तं पार्थिवत्वादि सामान्यं विषय इत्याह—पार्थिवत्वादीति।

24

एवं तावन् नञ्संनिधानाविर्भावितसामर्थ्यातिशयं ब्राह्मणपदमेव नरत्वे त्र्याधारे वर्तते नञेव वेत्युक्तम्। अधुना त्वावापोद्वापनिर्धारितनिष्कृष्टान्यपर्युदासब्राह्मणजातिवचनयोः नञ्ब्राह्मणशब्दयोर् नरत्ववचने शक्तिकल्पना न्याय्येति स्वार्थावस्थितयोरेव तयोर् यथा त्र्याधारनरत्वगोचरमब्राह्मणपदं संपद्यते, तद् दर्शयति—असाधारणेति। ब्राह्मणशब्दाद्धि श्रुत्यर्थसामर्थ्याद् बहवो ऽर्थाः प्रतिभासन्ते। श्रौतं ब्राह्मणत्वम्, आर्थास्तद्व्यापका नरत्वादयः। स इदानीमेवंविधो ब्राह्मणशब्दो नञा विशेष्यमाणो यो ऽस्यासाधारणो ऽर्थस् तत्पर्युदासेन विशिष्यते। स्वभाव एष नञो यदयं येन समभिव्याह्रियते तदर्थं

---

**1** °विनिर्मुक्तं ] $A_1G_1$ ; °व्यतिरिक्तम् $K_1$ ; °निर्मुक्तं $S_1$ **2** पार्थिवत्वादीति ] $A_1G_1S_1$ ; पार्थिवत्वादिसामान्यमेवमेवाघटादिदि घटत्वादिविनिर्मुक्तम् विषयः संप्रतीयते $K_1$ **4** नञ्संनिधाना° ] $A_1G_1K_1$ ; नञसामर्थ्यन्निध्या° $S_1^{ac}$ ; नञसान्निध्या° $S_1^{pc}$ **4** °सामर्थ्या° ] $A_1G_1K_1$ ; °शक्त्या° $S_1$ **5** त्र्याधारे ] $A_1G_1S_1$ ; त्याधारे $K_1$ **5** वर्तते नञेव वेत्युक्तम् ] $A_1G_1K_1$ ; वर्तत इति नञा चेत्युक्तं $S_1$ **5** त्वावापोद्वाप° ] $G_1K_1S_1$ ; त्वापोद्वाप° $A_1$ **6** °ब्राह्मण° ] $A_1G_1K_1$ ; °ब्राह्मणत्व° $S_1$ **6** नञ्ब्रा° ] $A_1G_1K_1$ ; नञब्रा° $S_1$ **7** °कल्पना ] $A_1G_1K_1$ ; °कल्पना न $S_1$ **8** °तयोरेव तयोर् यथा त्र्याधार° ] $K_1$ ; °तयोरेवान -- त्र्याधार° $A_1G_1$ ; °तयोर्यथार्थाधीन° $S_1$ **8** °ब्राह्मणपदं ] $K_1$ ; °ब्राह्मणादिपदं $A_1G_1S_1$ **9** असाधारणेति ] $A_1G_1S_1$ ; असाधारणभावाच्च नञा शब्दो विशेषितः तावन्मात्रेण रहिते सामान्ये व्यवतिष्ठते $K_1$ **9** °सामर्थ्याद् ] $A_1G_1K_1$ ; °सामर्थ्यद् $S_1$ **10** आर्थास्त° ] $A_1G_1K_1$ ; अर्थात्त° $S_1$ **10** स ] $A_1G_1S_1$ ; om. $K_1$ **10** °मेवंविधो ] $A_1G_1S_1$ ; °मेंविधो $K_1$ **11** विशेष्यमाणो यो ऽस्या° ] $K_1$ ; विशेष्यमा -- $A_1G_1$ ; विशिष्यमाणो यो स्या° $S_1$ **11** °साधारणो ऽर्थस् ] $S_1$ ; °साधारणार्थस् $A_1G_1$ ; °साधरणो र्थस् $K_1$ **12** तत्पर्युदासेन ] $A_1G_1S_1$ ; तत्पर्युदासेनैव $K_1$ **12** विशिष्यते ] $A_1G_1S_1$ ; विशेष्यते $K_1$ **12** नञो ] $A_1G_1S_1$ ; नञ $K_1$

पर्युदस्यतीति। एवं च यावन्नञा पर्युदस्तं तावन्मात्रेण रहिते नरत्वसामान्ये ऽब्राह्मणशब्दो वर्तिष्यते। श्रौतो हि तस्यार्थो नञापहृतो ब्राह्मणत्वम्। तत्सामान्यान्तरं तु नरत्वं नान्येन केनचिद्व्यावर्तितमिति तत्रास्यावस्थानं युक्तमेवेति, अतः साक्षादनुक्तमपि नरत्वमब्राह्मणपदप्रयोगप्रत्यययोरालम्बनमिति न किंचिदनुपपन्नमिति।

25ab

किं पुनः कारणं ब्राह्मणत्वप्रतिषेधे नरत्वमवगम्यत इति। श्रौते हि ब्राह्मणपदस्यार्थे ऽपहृते यद्यवश्यमर्थान्तरं गृहीतव्यम्, सन्ति तस्यापरे ऽपि द्रव्यत्वादयो ऽप्यर्था इति ते ऽपि प्रतीयेरन् न वा किंचित्। न हि श्रौतार्थनिषेधे ऽवश्यमर्थान्तरं गृहीतव्यं भवति, तन्निषेधमात्रेणापि शब्दोपपत्तेः। अत आह—विशेष इति। अयमभिप्रायः। न तावद् ब्राह्मणाभावमनाश्रयं शक्यं प्रत्येतुम्, भावोपष्टम्भशून्याभावप्रत्ययाभावादित्युक्तमेव।

25cd

अपि चायमब्राह्मणशब्दो वर्णत्रये प्रयुज्यमानो दृश्यते। तदस्य त्रिषु

---

**1** पर्युदस्यतीति ] $G_1K_1S_1$; पर्युदास्यतीति $A_1$ **1** च यावन्नञा ] $A_1G_1K_1^{pc}$; च नञा यावन्नञा $K_1^{ac}$; नञा यावात् $S_1$ **1** तावन्मात्रेण ] $A_1G_1$; तावन्मात्र° $K_1S_1$ **2** वर्तिष्यते ] $A_1G_1$; ऽवतिष्ठते $K_1S_1$ **2** श्रौतो हि तस्यार्थो ] $A_1G_1K_1$; श्रौतो ऽर्थो हि तस्य $S_1$ **2** °पहृतो ] $A_1G_1S_1$; परिहृतो $K_1$ **3** तत्सामान्यान्तरं ] $A_1G_1$; तत्सामान्यं $K_1S_1$ **3** नरत्वं नान्येन ] $A_1G_1$; नरत्वमार्थं न तदन्येन $K_1$; नरत्वमार्थं न $S_1$ **4** युक्तमेवेति, अतः ] $A_1G_1K_1$; युक्तमेवातः $S_1$ **5** °पद° ] $A_1G_1S_1$; om. $K_1$ **5** °योगप्रत्यययोरा° ] $A_1G_1K_1$; °योगा° $S_1$ **5** न किंचिदनुपपन्नमिति ] $A_1G_1S_1$; om. $K_1$ **7** कारणं ] $A_1G_1S_1$; कारणत्वं $K_1$ **7** °प्रतिषेधे ] $A_1G_1$; °निषेधे $K_1$; °प्रतिषेधेन $S_1$ **8** ऽपहृते ] $A_1G_1S_1$; परिहृते $K_1$ **8** °वश्यम° ] $A_1G_1K_1$; °वश्यमार्थम° $S_1$ **8** °तव्यम् ] $A_1G_1K_1$; °तव्यमिति $S_1$ **9** द्रव्यत्वादयो ] $A_1G_1K_1$; द्रव्यसदादयो $S_1$ **9** ऽप्यर्था ] $A_1G_1K_1$; प्यर्था आर्था $S_1$ **9** इति ] $A_1G_1K_1$; om. $S_1$ **11** विशेष इति ] $A_1G_1$; विशेषे प्रतिषिद्धे च सामान्यं यदनन्तरम् सामान्याकांक्षिणं शब्दन्निरुणद्धि तदात्मनि $K_1$; विशेषेति $S_1$ **13** °पष्टम्भ° ] $A_1G_1S_1$; °पष्ठंभन° $K_1$

वर्तितुमस्ति सामान्याकाङ्क्षेति न तावद् ब्राह्मणप्रतिषेधमात्रेण शब्दस्य कृतार्थता। तदिदमुक्तम्—सामान्याकाङ्क्षिणं शब्दमिति। कथमिदानीं नरत्वे ऽवस्थापितमिति। अत्रापि ब्रूमः। नरत्वस्य विशेषे ब्राह्मणत्वे प्रतिषिद्धे यत्तस्यानन्तरं नरत्वं तदेव सामान्याकाङ्क्षिणमब्राह्मणशब्दमात्मनि निरुणद्ध्यवस्थापयति, नार्थान्तरं यावद् गन्तुं ददातीत्यर्थः। तद्धि ब्राह्मणत्वादीनामनन्तरम्। तस्य हि ते विशेषा इति तन्निषेधे प्रत्यासत्त्या तदेव बुद्धौ भवति। प्राणित्वादयस्तु नरत्वादीनां सामान्यमिति न ते ब्राह्मणत्वस्यानन्तरा इति नाब्राह्मणपदं तेष्ववतिष्ठत इति।

26ab

एवं तावदनन्तरं नरत्वसामान्यमेव, नाब्राह्मणपदमन्यत्र वर्तितुं ददातीत्युक्तम्। अब्राह्मणशब्दस्यापि तेनैव प्रथमावगतेन सामान्याकाङ्क्षा निवर्तत इति तस्यापि तदतिक्रमे न किंचित्कारणं पश्यामः। कुतश्चिद्धि कारणविशेषात् प्रथमावगतमतिक्रम्येत यथा वक्ष्यति—कारणादतिक्रम इति। असति तु कारणे प्रथमावगतमेव गृहीतुं न्याय्यम्। “कपिञ्जलानालभेत” इति कपिञ्जलबहुत्व इव त्रित्वम्। अवश्यं हि चतुरादीनुपाददानस्य त्रय उपादातव्याः। तावतैव कृते

---

**15 कारणादतिक्रम इति** ] *Jaiminisūtra* 11.1.43: प्रथमं वा नियम्येत कारणादतिक्रमः स्यात्।

---

**1 वर्तितुमस्ति** ] $A_1G_1K_1$; वर्तितव्ये स्ति $S_1$ **1 ब्राह्मण°** ] $K_1S_1$; ब्राह्मणमात्र° $A_1G_1$ **3 ऽवस्थापितमिति** ] em.; ऽवस्थापिनमिति $A_1G_1$; ऽवस्थानमिति $K_1S_1$ **4 नरत्वं** ] $A_1G_1K_1$; नरत्वसामान्यं $S_1$ **7 प्राणि°** ] $K_1S_1$; प्राणिक° $A_1G_1$ **12 प्रथमावगतेन** ] $A_1G_1K_1$; प्रथममागतेन $S_1$ **13 निवर्तत इति** ] $A_1G_1K_1$; निवर्तितेति $S_1$ **13 पश्यामः** ] $A_1G_1K_1$; om. $S_1$ **14 कुतश्चिद्धि** ] $A_1G_1S_1$; कुतश्चित् $K_1$ **14 प्रथमावगतम°** ] $A_1G_1$; प्रथमावगतमप्य° $K_1S_1$ **14 यथा** ] $A_1G_1K_1$; तथा च $S_1$ **15 कारणादतिक्रम** ] $A_1G_1K_1S_1^{pc}$; कारणातिक्रम $S_1^{ac}$ **16 °लभेत** ] $A_1G_1$; °लंभेत $K_1$; °लभत $S_1$ **16 कपिञ्जल°** ] $A_1G_1K_1$; om. $S_1$ **17 चतुरादीनुपाददानस्य** ] $A_1G_1K_1$; चतुराद्युपादाने $S_1$ **17 तावतैव** ] $A_1G_1K_1$; तावतैव च $S_1$

शास्त्रार्थे बहुत्वसंपदि जातायां न चतुरादीनामुपादानं न्याय्यम्, अर्क इव मधुलाभे नगप्रयाणमित्यभिप्रायेणाह—प्रथमेति।

26cd

अतः सिद्धं ब्राह्मणत्वादपेतं नरत्वमब्राह्मणपदवाच्यमवतिष्ठत इत्याह—ब्राह्मणत्वादिति।

27

किं पुनर् ब्राह्मणत्वमिव नरत्वमपि नञा न व्युदस्यते येन तदवतिष्ठेत। अत आह—व्युदस्येति। नञा ह्यत्र ब्राह्मणपदं विशिष्यते। तस्य च विशेषणत्वं ब्राह्मणत्वव्युदासेनैव जातमिति यदपरं नरत्वस्यापि व्युदसनं कल्प्येत तदश्रुतमेव। श्रौतो हि ब्राह्मणपदार्थ इति सततः शीघ्रमवगम्यत इति नञर्थेनापि तस्यैव श्रौतः संबन्धः। नरत्वस्य तु नञ्संबन्धो ऽश्रौत एव कल्पितो भवेत्। न च तद्युक्तम्।

पूर्वं चासाधारण्येन ब्राह्मणत्वस्य प्रतिषेध उक्तः। स हि ब्राह्मणपदस्यासाधारणो ऽर्थः। नरत्वादयस्त्वर्थसामर्थ्यात् क्षत्रियादिशब्देभ्यो

---

**2 अर्क इव मधुलाभे** ] *Śābarabhāṣya* ad 1.2.4: **अर्के चेन्मधु विन्देत किमर्थं पर्वतं व्रजेत्। इष्टस्यार्थस्य संसिद्धौ को विद्वान् यत्नमाचरेत्॥**

---

**1 चतुरादीनामुपादानं** ] $A_1G_1$; **चतुरादीनामुपादान** $K_1$; **चतुराद्यादानं** $S_1$ **2 प्रथमेति** ] $A_1G_1S_1$; **प्रथमातिक्रमे चास्य कारणन्नैव विद्यते** $K_1$ **5 ब्राह्मणत्वादिति** ] $A_1G_1$; **ब्राह्मणत्वादतो ऽपेतं नरत्वमवशिष्यते** $K_1$; **ब्राह्मणत्वादीति** $S_1$ **7 ब्राह्मणत्वमिव** ] $A_1G_1K_1$; om. $S_1$ **8 तदवतिष्ठेत** ] $G_1S_1$; **तदवतिष्ठते** $K_1$; **तदवतिष्ठतो** $A_1$ **8 व्युदस्येति** ] $A_1G_1S_1$; **व्युदस्य ब्राह्मणत्वन्तु नञि जाते विशेषेण** $K_1$(unmetrical) **8 नञा ह्यत्र** ] $A_1G_1K_1$; **नञात्र** $S_1$ **8 विशिष्यते** ] $A_1G_1S_1$; **विशेष्यते** $K_1$ **9 ब्राह्मणत्व॰** ] $K_1S_1$; **ब्राह्मण॰** $A_1G_1$ **10 हि** ] $A_1G_1S_1$; **हि तस्य** $K_1$ **10 ब्राह्मणपदार्थ** ] $A_1G_1S_1$; **ब्राह्मणत्वार्थ** $K_1$ **11 तस्यैव** ] $A_1G_1K_1$; **तस्य** $S_1$ **11 नरत्वस्य** ] $A_1G_1K_1^{pc}S_1$; **नरस्यतुत्वस्य** $K_1^{ac}$ **12 नञ्संबन्धो** ] $A_1G_1K_1^{ac}$; **नञर्थसंबन्धो** $K_1^{pc}S_1$ **13 पूर्वं चा॰** ] $A_1G_1$; **पूर्वन्त्वा॰** $K_1$; **पूर्वञ्च नञा॰** $S_1$ **13 ब्राह्मणत्वस्य** ] $A_1G_1K_1$; **ब्राह्मणत्व॰** $S_1$ **14 नरत्वादय॰** ] $K_1S_1$; **नरस्त्वादय॰** $A_1G_1$ **14 क्षत्रियादि॰** ] $A_1G_1S_1$; **क्षत्रियादिषु** $K_1$

ऽपि प्रतीयन्त एव। इह तु श्रुत्यर्थकारितो विशेष उक्त इति विवेक इति। अतः सिद्धं ब्राह्मणत्वादपेतं नरत्वमब्राह्मणपदार्थ इति।

28abc

उपसंहरति—तस्मादिति सामान्यमन्तेन। यस्य नरत्वस्य ते ब्राह्मणत्वादयो भेदा निषिध्यन्ते, तदेवार्थात्क्षत्रियादिभेदान्तरस्थं प्रतीयते, निर्विशेषसामान्यानुपपत्तेर् एकविशेषप्रतिषेधाच्चेति भावः।

28d

ईदृश्येव लोकस्याप्यब्राह्मणपदात्प्रतीतिः। न तु व्याख्याकौशलमात्रेणास्माभिरेतत्कल्पितमित्याह—लोक इति। दृष्टं चेदमर्थादन्यतो व्यावृत्तस्य नरत्वस्य क्वचिदवस्थानम्, यथा "नरमानय सुरां वोढुम्" इत्यन्यवर्णे।

29ab

अतो नानेनोपालम्भो नञ इत्यभिप्रायेणाह—प्रसङ्गिन्यामिति। नरशब्दाद्धि वस्तुस्वभावतश्चतुर्ष्वपि वर्णेषु नरत्वस्य बुद्धिः प्रसङ्गिनी भवति। प्रसजतीति यावत्। सार्थात् त्रिभ्यो निवर्तते, त्रयाणां सुरावहनासंभवात्, एवं नञापि ब्राह्मणत्वादपेतं त्र्याधारं नरत्वमवस्थाप्यत इति न किंचिदनुपपन्नमिति।

**1** एव ] $A_1G_1K_1$ ; एवेति $S_1$  **2** इति विवेक इति ] $A_1G_1K_1$ ; इति $S_1$  **2** °पदार्थ ] $A_1G_1K_1$ ; °शब्दार्थ $S_1$  **4** तस्मादिति सामान्यमन्तेन ] $A_1G_1S_1$ ; तस्माद्यस्यैव ते भेदा निषिद्ध्येरंस्तत्रदर्थतः भेदान्तरस्थं सामान्यम् $K_1$ (unmetrical) **8** लोकस्याप्य° ] $A_1G_1$ ; च लोकस्याप्य° $K_1$ ; लोकस्या° $S_1$  **9** °कौशलमा° ] $A_1G_1S_1$ ; °कौशलम् मा° $K_1$  **9** लोक इति ] $A_1G_1S_1$ ; लोके प्येवं प्रतीयते $K_1$  **9** चेदम° ] $S_1$ ; चेदमप्य° $A_1G_1$ ; चैतद° $K_1$  **10** व्यावृत्तस्य ] $G_1^{pc}K_1S_1$ ; व्यावृत्वस्य $A_1G_1^{ac}$  **11** इत्यन्यवर्णे ] $A_1G_1S_1$ ; इत्यस्त्येवर्णे $K_1^{ac}$ ; इत्यन्त्यवर्णे $K_1^{pc}$  **13** नानेनो° ] $A_1G_1K_1$ ; नानेको° $S_1$  **13** प्रसङ्गिन्यामिति ] $A_1G_1S_1$ ; प्रसंगिन्याञ्च तद्बुद्धौ निषेधो र्थादपीष्यते $K_1$  **14** वस्तु° ] $A_1G_1K_1$ ; वस्त° $S_1$  **14** °भावतश्च° ] $A_1G_1S_1$ ; °भावाच्च° $K_1$  **15** सार्थात् ] $A_1G_1K_1$ ; सामर्थ्यात् $S_1$  **15** निवर्तते ] $A_1G_1K_1^{pc}S_1$ ; निवर्तन्ते $K_1^{ac}$  **16** नञापि ] $A_1G_1S_1$ ; नञः दि $K_1^{ac}$ ; नञः $K_1^{pc}$  **17** °मवस्थाप्यत ] $A_1G_1K_1$ ; °मास्थाप्यत $S_1$

29cd

एवं तावद् ब्राह्मणत्वप्रतिषेधे ऽर्थाद् भेदान्तरस्थं नरत्वमवसीयत इत्युक्तम्। अथेदानीमब्राह्मणपदस्यालम्बनान्तरं दर्शयति—तन्मात्रस्येति। अब्राह्मणपदस्य हि सामान्येन ब्राह्मण्यमात्ररहितो ऽर्थः। अब्राह्मण इति किमुक्तं भवति। ब्राह्मण्यरहितः को ऽपीति। स इदानीं क इत्यपेक्षिते सादृश्यात्क्षत्रियादयो ऽवतिष्ठन्ते। व्रीह्यभाव इव नीवारादयः, सदृशप्रतिषेधे सदृशान्तरमेव बुद्धौ भवति यतः। एवं च ब्राह्मणसादृश्यमेव ब्राह्मणाभावप्रतीतावालम्बनमुक्तं भवति। तच्च त्र्याधारमेव हस्ताद्यवयवसामान्याभेदेन क्षत्रियादीनामिति त एवाब्राह्मणपदार्था अवतिष्ठन्ते। अतो ब्राह्मण्यमात्ररहितमुक्त्वोदासीने शब्दे ऽर्थसामर्थ्यादेव सादृश्यात्क्षत्रियादिप्रतीतिरित्युक्तमिति।

30ab

एवं तावद् अर्थात् सादृश्यालम्बनत्वमुक्तम्। तदपि वा नञो वाच्यमेवेत्याह—सादृश्यमिति। ब्राह्मणप्रतिषेधमुक्त्वाब्राह्मणादिषु सादृ-

---

**2 एवं तावद्** ] $A_1G_1K_1$; एतावता $S_1$ **2 °प्रतिषेधे** ] $K_1S_1$; °निषेधे $A_1G_1$ **2 °मवसीयत** ] $A_1G_1S_1$; °मवगम्यते $K_1$ **4 तन्मात्रस्येति** ] $A_1G_1S_1$; तन्मात्रात्ररहिते चार्थे सादृश्यात्तन्मतिर्भवेत् $K_1$(unmetrical) **4 ब्राह्मण्य°** ] $A_1G_1K_1$; ब्राह्मण° $S_1$ **4 °रहितो ऽर्थः** ] $A_1G_1S_1$; °रहिर्थैः $K_1$ **5 ब्राह्मण्य°** ] $K_1$; ब्राह्मण° $A_1G_1$; ब्राह्मणत्व° $S_1$ **5 को ऽपीति** ] $A_1G_1S_1$; को पि $K_1$ **7 नीवारा°** ] $A_1G_1S_1$; नीरावा° $K_1$ **7 सदृश°** ] $A_1G_1K_1$; सदृशः $S_1$ **8 °मेव ब्राह्मणाभाव°** ] $A_1G_1K_1$; °मेवाब्राह्मण° $S_1$ **8 °लम्बनमुक्तं भवति** ] $A_1G_1S_1$; °लम्नम् भवतीत्युक्तम् भवति $K_1$ **9 त्र्याधारमेव हस्ताद्यवयवसामान्या°** ] $A_1G_1$; त्रयाणामेव हस्ताद्यवयवसामान्या° $K_1$; त्रयाणामेव स्थूलसूक्ष्मादि° $S_1$ **10 °र्था अवतिष्ठन्ते** ] $A_1G_1S_1$; °र्थौ वतिष्ठते $K_1$ **10 अतो** ] $A_1G_1S_1$; अत एव $K_1$ **10 ब्राह्मण्य°** ] $K_1$; ब्राह्मण° $A_1G_1$; ब्राह्मणत्व° $S_1$ **10 °रहित°** ] $A_1G_1S_1$; °राहित्य° $K_1$ **10 °मुक्त्वो°** ] $K_1$; °मुक्तो° $A_1G_1$; °मात्रमुक्त्वो° $S_1$ **13 अर्थात्** ] $A_1G_1K_1S_1^{pc}$; om. $S_1^{ac}$ **13 सादृश्यालम्बनत्वमुक्तम्** ] $A_1G_1S_1$; सादृश्यमालम्बनमित्युक्तम् $K_1$ **13 तदपि वा नञो** ] $A_1G_1$; तदपि च नञो $K_1$; तदपि नञा $S_1$

श्यमपि वाच्यमेवेष्टमित्यर्थः। एष चात्राभिप्रायः—अब्राह्मणपदाद्धि ब्राह्मणसदृशा एव तद्विमुक्ताश्च त्रयो भासन्ते, न तदन्यमात्रम्। अतः सादृश्यमपि नीवारादीनामिवास्य वाच्यमिति।

30c

कथं पुनर् ब्राह्मणादीनां सादृश्यम्। अत आह—तच्चावयवसामान्यादिति। हस्ताद्यवयवसामान्यादेव ब्राह्मणादिजातीनां गोगवयजात्योरिव सादृश्यं सिध्यत्येव, अब्राह्मणादिषु ब्राह्मणजातीयानामवयवसामान्याभावात्।

30d

अघटादिषु कथं। न हि तत्र सर्वाघटादीनाम् अवयवसामान्यमस्ति। अत आह—विनेति। नावश्यम् अवयवसामान्यादेव सर्वत्र सादृश्यम्। विनापि तेन क्वचिल्लक्ष्यत एवेत्युक्तम्—एवं जातिगुणेत्यत्र। अतो

---

**12 एवं जातिगुणेत्यत्र** ] *Ślokavārttika upamāna* 20ab: एवं जातिगुणद्रव्यक्रियाशक्तिस्वधर्मतः।

---

**1 सादृश्यमपि** ] $A_1G_1K_1^{pc}S_1$; सामान्यदृश्यमपि $K_1^{ac}$ **1 °त्यर्थः** ] $A_1G_1$; °ति भावः $K_1S_1$ **2 तद्विमुक्ताश्च त्रयो** ] $A_1G_1$; तद्विभक्ताश्च त्रयो $K_1$; तद्विभक्तास्त्रयो वर्णा $S_1$ **2 न** ] $G_1K_1S_1$; om. $A_1$ **3 सादृश्यमपि नीवारादी°** ] $A_1G_1K_1$; सदृश्यमपीवादी° $S_1$ **3 °मिवास्य** ] $A_1G_1K_1$; °मिव $S_1$ **6 तच्चावयवसामान्यादिति** ] $A_1G_1$; तच्चावयवसामान्यात् $K_1$; तच्चेति $S_1$ **7 ब्राह्मणादिजातीनां गोगवयजात्योरिव** ] $A_1G_1S_1$; गोगवयजात्योरिव ब्राह्मणादिजातीनाम् $K_1$ **7 सादृश्यं** ] $S_1$; सादृश्यमिति $A_1G_1K_1$ **7 °त्येव, अ°** ] $A_1G_1$; °त्येव $S_1^{ac}$; °त्येवम° $K_1S_1^{pc}$ **8 °ब्राह्मणादिषु ब्राह्मणजातीयानामवयवसामान्या°** ] $A_1G_1$; °ब्राह्मणादिजातीनामवयवसामान्या° $K_1$; °ब्राह्मणादिषु ब्राह्मणादिजातिसमान्य° $S_1$ **10 अघटादिषु** ] $A_1G_1K_1$; अघटादिषु तु $S_1$ **10 न हि** ] $A_1G_1S_1$; तर्हि $K_1$ **10 अवयवसामान्यमस्ति। अत आह—विनेति। नावश्यम्** ] em.; om. $A_1G_1$(eyeskip); अवयवसामान्यमस्त्यत आह विनाप्येतेन लक्ष्यते नावश्यम् $K_1$; अवयसामान्यमस्त्यत आह विनेति नावश्यम् $S_1$ **11 सर्वत्र** ] $A_1G_1S_1$; सर्व° $K_1$ **12 विनापि तेन** ] $A_1G_1K_1$; तद्विनापि $S_1$ **12 एवेत्युक्तम्** ] $A_1G_1$ $K_1$; इत्युक्तमेव $S_1$

ऽघटानामपि शरावादीनां घटेनाब्धारणादिक्रियासादृश्यमुत्पत्तिसादृश्यं वा वाच्यम्। समानं हि कुलालादिकारणमुत्पत्तौ घटादीनाम्। अन्येषां च पार्थिवानां काठिन्यादिगुणसामान्यमिति।

31

यदि तर्हि सादृश्यं नञो वाच्यमर्थाद्वा तदालम्बनम्, एवं सत्यसति सादृश्ये कथमनीक्षणादौ नञो वृत्तिः। न हि तत्रेक्षणसदृशी क्रिया शास्त्रार्थः। अत आह—क्वचिदिति। अयमभिप्रायः। नावश्यं सर्वत्रैव सादृश्यान्नञ्युक्तशब्दवृत्तिः, क्वचिदनीक्षणादौ विनापि सादृश्यं साहचर्यादिना प्रवृत्त्युपपत्तेः। तच्चैतच्चतुर्थे वक्ष्यति “तत्र नेक्षतोद्यन्तमादित्यम्” इत्यत्र। धात्वर्थयोगिनो नञो ऽनीक्षणविधिर्वक्ष्यते। “नेक्षत” इति नायमर्थः “ईक्षणं न कुर्यात्” इति, “न हन्यात्” इतिवत्। किंतु “अनीक्षणं कुर्यात्” इति। तत्र किं तदनीक्षणमित्यपेक्षायां विधिविषयभावात् काचित् क्रिया परिप्लवते। नाक्रियाविषयो विधिर्यतः। तत्र सर्वक्रियाणां सहचरितो ऽविनाभावी मूलभूतः संकल्प इति क्रियान्तरं प्रतिपद्यमानेन प्रथमं संकल्प

---

**9 वक्ष्यति** ] *Jaiminisūtra* 4.1.3

---

**1 ऽघटानामपि** ] $A_1G_1S_1$ ; **घटादीनामपि** $K_1$   **1 घटेना°** ] $A_1G_1K_1$ ; **घटना°** $S_1$   **2 कुलालादि°** ] $G_1K_1S_1$ ; **कुलादि°** $A_1$   **5 सादृश्यं** ] $A_1G_1K_1$ ; **सादृश्यमपि** $S_1$   **6 सत्यसति सादृश्ये** ] $K_1S_1$ ; **सति असादृश्ये** $A_1G_1$   **7 क्वचिदिति** ] $A_1G_1S_1$ ; **क्वचिद्विनापि सादृश्यात् साहचर्यादिहेतुका नञ्युक्तशब्दवृत्ति स्यात् यथा वक्ष्यत्यनीक्षणे** $K_1$   **8 °न्नञ्युक्त** ] $A_1G_1K_1$ ; **°न्नञित्युक्त°** $S_1$   **8 °वृत्तिः** ] $A_1G_1K_1$ ; **°प्रवृत्तिः** $S_1$   **8 विनापि** ] $A_1G_1S_1$ ; **विना** $K_1$   **9 वक्ष्यति** ] $A_1G_1K_1$ ; **वक्ष्यते** $S_1$   **9 तत्र** ] $A_1G_1K_1$ ; **तत्र हि** $S_1$   **10 °योगिनो** ] $A_1G_1K_1$ ; **°योगित्वान्** $S_1$   **11 °र्वक्ष्यते** ] $A_1G_1K_1$ ; **°र्लक्ष्यते ततः** $S_1$   **12 इतिवत्** ] $A_1G_1K_1$ ; **इत्यादिवत्** $S_1$   **13 काचित्** ] $A_1G_1K_1$ ; om. $S_1$   **14 ना°** ] $G_1K_1S_1$ ; **न** $A_1$   **14 °क्रियाणां** ] $A_1G_1K_1$ ; **°क्रिया°** $S_1$   **15 ऽविनाभावी** ] $A_1G_1K_1$ ; **विनाभाव** $S_1$

एवालम्बनीयः। तत्र तस्यैव प्रथमावगतस्यातिक्रमे कारणाभावात् स एव शास्त्रार्थो भवति। न चासौ निर्विषयः संभवतीति विषयापेक्षायां प्रत्यासत्त्या तदनुरञ्जकमनीक्षणमेव विषयतयावगम्यते। "नेक्षेतादित्यम्" इति किमुक्तं भवति। "आदित्यं नेक्षिष्ये" इति संकल्पं कुर्यात्—इति।

किं पुनः "न हन्यात्" इत्यादिवद् ईक्षणप्रतिषेध एवात्र विध्यर्थो न भवति। व्रताधिकारात्। तस्य व्रतमिति ह्युपक्रम्य ब्रह्मचारिणो धर्मा नियम्यन्ते। यदि चेक्षणप्रतिषेध एवायं भवेत्, व्रतशब्दसंयोग एव नोपपद्येत, क्रियावचनत्वात्तस्याक्रियायां प्रवृत्त्यसंभवात्। अतो ऽयमनीक्षणसंकल्प एवात्रोपात्तदुरितक्षयार्थो विधीयते। श्रूयते हि तत्र "एतावता हैनसा विमुक्तो भवति" इति।

---

**11** *Śābarabhāṣya* ad 4.1.3: अपि च "एतावता हैनसायुक्तो भवति" इति पुरुषसंबद्धो दोषः कीर्त्यते, न कर्मसंबद्धः। तस्मात् पुरुषार्थानि प्रजापतिव्रतानीति।

---

**1 एवालम्बनीयः** ] $A_1G_1S_1$; एवावगम्यते $K_1$ **1 तस्यैव** ] $A_1G_1K_1$; तथैव $S_1$ **1 °गतस्या°** ] $K_1S_1$; °गतस्यैवा° $A_1G_1$ **1 °तिक्रमे** ] $K_1S_1$; °तिक्रमणे $A_1G_1$ **2 निर्विषयः संभवतीति** ] $A_1G_1S_1$; निर्विषयास्संभवन्तीति $K_1$ **3 प्रत्यासत्त्या** ] $A_1G_1K_1$; प्रत्यक्षात् $S_1$ **3 °नुरञ्जकम°** ] $A_1G_1K_1$; °नुरक्तम° $S_1$ **4 नेक्षेतादित्यम्** ] $A_1G_1K_1$; नेक्षेतोद्यन्तम् $S_1$ **4 नेक्षिष्ये** ] $A_1G_1K_1^{pc}S_1$; नेक्षिष्येत $K_1^{ac}$ **7 एवात्र विध्यर्थो** ] $A_1G_1S_1$; एव न शास्त्रार्थो $K_1^{ac}$; एव शास्त्रार्थो $K_1^{pc}$ **7 ह्युपक्रम्य** ] $S_1$; प्रक्रम्य $A_1G_1K_1$ **9 °योग एव** ] $A_1G_1K_1$; °योगो $S_1$ **9 °क्रियायां** ] $A_1G_1K_1$; °क्रियाया $S_1$ **9 प्रवृत्त्य°** ] $A_1G_1K_1$; वृत्त्य° $S_1$ **10 अतो ऽय°** ] $A_1G_1$; तदय° $K_1$; अत एवाय° $S_1$ **10 एवात्रो°** ] $A_1G_1K_1$; एवातोत्रो° $S_1$ **11 तत्र** ] $A_1G_1S_1$; om. $K_1$ **11 एतावता हैनसा** ] $K_1$; एतावता हेनसा $A_1G_1$; ह्येनसा $S_1$ **11 विमुक्तो भवति" इति** ] $A_1G_1K_1$; युज्यत इत्युक्तो भवतीति $S_1$

कथं नु पर्णतादिवदकामपदोपबन्धमेनोनिबर्हणमस्य फलम्। फलान्तराश्रवणात्, अर्थवादोपात्तफलपदविपरिणामेन चोपपत्तौ विश्वजिदादिवद् अध्याहारेण स्वर्गकल्पनानुपपत्तेः। अध्याहाराद् विपरिणामो ज्यायानिति न्यायात्। न चास्य क्रतूपकारः फलम्, तत्संबन्धे प्रमाणाभावात्। अप्रकरणाधीतत्वाल् लोकवेदसाधारणेक्षणोपलक्षणीयस्यानीक्षणस्याव्यभिचरितक्रतुसंबन्धजुह्वाद्युद्देशविहितपर्णतादिवत् क्रत्वनुप्रवेशानुपपत्तेः। अतो बहिरेवायं पुरुषार्थो ऽनीक्षणसंकल्पो विधीयते। आह च —

त्रिसन्ध्यं तत्र गायत्रीं जपता नेक्ष इत्ययम्।
आदित्यं ध्यायता कार्यः संकल्पः पापनाशनः॥ इति।

क्वचिच्चाकुर्वन् विहितं कर्मेत्यादावक्रियायाः क्रियाप्रागभावस्य प्रत्यवायनिमित्तत्वासंभवादवर्जनीयतया किंचिदापतितक्रियान्तरं विहिताकरणत्वेनालम्ब्यते। सर्वो हि विहितमकुर्वन् किंचित्करोत्येवान्त-

---

**1** पर्णतादि° ] *Jaiminisūtra* 4.3.1: द्रव्यसंस्कारकर्मसु परार्थत्वात् फलश्रुतिरर्थवादः स्यात्॥; *Śābarabhāṣya* ad 4.3.1: यस्य खादिरः स्रुवो भवति स छन्दसामेव रसेनावद्यति सरसा अस्याहुतयो भवन्ति। यस्य पर्णमयी जुहूर्भवति न स पापं श्लोकं शृणोति (≈ *Taittirīyasaṃhitā* 3.5.7.1–2) इति।

---

**1** पर्ण° ] $A_1G_1K_1$ ; पर्णमय° $S_1$ **1** °तादिवद° ] $A_1G_1K_1$ ; °तादिफलवद° $S_1$ **1** °मपदोपबन्धमेनो° ] $A_1G_1$ ; °मोपनिबन्धनमेनो° $K_1$ ; °मनोपबन्धमेनो° $S_1$ **1** फलम् ] $A_1G_1S_1$ ; फलमिति $K_1$ **2** °श्रवणात् ] $K_1S_1$ ; °श्रयणात् $A_1G_1$ **2** अर्थवादोपात्त° ] $A_1G_1K_1$ ; अथवा दोषात्तु $S_1$ **2** °विपरिणामेन ] $A_1G_1K_1$ ; °परिणामेन $S_1$ **4** अध्याहाराद् ] $K_1S_1$ ; अध्याहार° $A_1G_1$ **4** न्यायात् ] $A_1G_1$ ; हि न्यायः $K_1$ ; न्यायो $S_1$ **4** न चास्य ] $A_1G_1S_1$ ; नास्य $K_1$ **5** तत्संबन्धे ] $A_1G_1K_1$ ; तत्संबन्ध° $S_1$ **6** °रणेक्षणो° ] $A_1G_1K_1$ ; °रणो° $S_1$ **6** °पलक्षणीयस्यानीक्षणस्या° ] $A_1G_1S_1$ ; °पलक्षणीयस्या° $K_1$(eyeskip) **7** °द्देश° ] $A_1G_1K_1$ ; °द्देशेन $S_1$ **7** °पर्ण° ] $A_1G_1K_1$ ; °पर्णमयि° $S_1$ **7** क्रत्वनुप्रवेशा° ] $A_1G_1$ ; क्रत्वनु+++ $K_1$ ; क्रत्वर्था° $S_1$ **10** संकल्पः ] $A_1G_1S_1$ ; संवृत्ताकल्पः $K_1$(unmetrical) **12** °दापतित° ] $A_1G_1K_1$ ; °दायत्त° $S_1$ **13** °लम्ब्यते ] $A_1G_1K_1$ ; °लक्ष्यते $S_1$ **13** °त्करोत्येवा° ] $A_1G_1$ ; °त्करोत्य° $K_1S_1$

रुच्छ्वासादि। तद्विहिताकरणं प्रत्यवायाय भवति, नाभाव एव केवलः। तदिहावर्जनीयतयैव क्रियान्तरपरिग्रहः। तदिदमादिशब्देनोपात्तम्। अत्र चाव्यापकत्वान्न सादृश्यं नञ्युक्तशब्दानामालम्बनमित्युक्तम्। अब्राह्मणशब्दोक्तेनैव तु प्रकारेण सर्वत्र नञ्युक्तशब्दानां वृत्तिराश्रयणीयेति।

32

अनीक्षणन्यायमेव विवृणोति—ईक्षणेति। उक्तमिदं व्रताधिकारादनीक्षणविधेरीक्षणव्यतिरिक्तक्रियापेक्षायां संकल्पस्याग्रभावित्वात् प्रत्यासन्नत्वम्। तस्य च प्रत्यासन्नस्यातिक्रमे कारणाभावात्स एवानीक्षणविधेर्विषयो भवति। न तु संकल्पमतिक्रम्येक्षणव्यतिरिक्ता तत्रापेक्षिता क्रिया प्रतीयते। यथा ब्राह्मणत्वप्रतिषेधे सामान्यान्तरापेक्षायां प्रत्यासन्ननरत्वातिक्रमे कारणाभावात् तद्ग्रहणमुक्तम्,

---

**1** **°च्छ्वासादि** ] $A_1G_1S_1$; **°च्छ्वासादिकम्** $K_1$ **1** **भवति** ] $A_1G_1K_1$; **प्रभवति** $S_1$ **2** **केवलः** ] $K_1S_1$; **केवलं** $A_1G_1$ **2** **तदिहा°** ] $A_1G_1K_1$; **तथा°** $S_1$ **2** **°तयैव** ] $A_1G_1S_1$; **°तया** $K_1$ **2** **क्रियान्तरपरिग्रहः** ] $A_1G_1K_1$; **क्रियान्तरं परिगृहीतम्** $S_1$ **3** **°शब्देनोपात्तम्** ] $A_1G_1S_1$; **°शब्देनोत्तम्** $K_1$ **3** **°त्वान्न सादृश्यं** ] $A_1G_1K_1$; **°त्वात् सादृश्यालंवनत्वं न** $S_1$ **3** **नञ्युक्त°** ] $A_1G_1K_1$; **नञ्°** $S_1$ **4** **°मालम्बनमि°** ] $G_1K_1S_1$; **°मालम्बननिमित्त°** $A_1$ **4** **तु** ] $A_1G_1S_1$; om. $K_1$ **4** **सर्वत्र** ] $A_1G_1K_1$; om. $S_1$ **7** **ईक्षणेति** ] $A_1G_1S_1$; **ईक्षणव्यतिरिक्ता हि क्रिया तत्रप्यपेक्षिता प्रत्यासत्तेर्न संकल्पमतिक्रम्य प्रतीयते** $K_1$ **8** **°रादनीक्षणविधेरीक्षण°** ] $A_1G_1K_1^{pc}$; **°रादीक्षण°** $K_1^{ac}S_1$ **8** **°पेक्षायां** ] $A_1G_1S_1$; **°प्रतीक्षायाम्** $K_1$ **8** **संकल्पस्याग्र°** ] $A_1G_1$; **संकल्पस्यैव प्रथम°** $K_1$; **संकल्पस्यैवाग°** $S_1$ **9** **प्रत्यासन्नस्यातिक्रमे** ] $A_1K_1S_1$; **प्रत्यासन्नत्वं तस्य प्रत्यासन्नस्यातिक्रमे** $G_1$ **10** **°णविधेर्विषयो** ] $A_1G_1K_1$; **°णविषयो** $S_1$ **11** **°क्ता तत्रापेक्षिता** ] $A_1G_1$; **°क्ता हि तत्रापेक्षिता** $K_1$; **°क्तापेक्षिता** $S_1$ **11** **ब्राह्मणत्व°** ] $A_1G_1K_1$; **ब्राह्मण°** $S_1$ **12** **°सन्ननरत्वा°** ] $A_1G_1^{pc}K_1^{pc}S_1$; **°सन्नरहितत्वा°** $G_1^{ac}$; **°सन्नतरत्वा°** $K_1^{ac}$ **12** **°क्रमे** ] $K_1S_1$; **°क्रम°** $A_1G_1$ **12** **°भावात् तद्ग्र°** ] $K_1S_1$; **°भावाद् ग्र°** $A_1G_1$

एवमिहापीति “तत्रापि” इत्यपिशब्देन दर्शयतीति।

33ab

अतः सिद्धमनीक्षणे धात्वर्थयोगिनो नञो नामयोगिन इव न प्रतिषेधकत्वमित्याह—नामेति। नामग्रहणं दृष्टान्तार्थमिति। द्विधा च नामयोग्यन्यमात्रवचनो विरोधिवचनो वा यथादर्शनमाश्रयणीयः।

33cd

न त्वाख्यातयोगिवत् क्वचिन्निषेधकत्वमित्याह—वदत इति। अब्राह्मणं ब्राह्मणादन्यं नञ् वदति, अधर्मं च धर्मविरोधिनम्। न तु धर्मादन्यमात्रमधर्म इति लौकिका मन्यन्ते। अयं च शब्दविशेषोपश्लेषकारित एव भेदो वेदितव्य इति।

34

यत्र तर्हि “न हन्यात्” “न पिबेत्” इत्यादावाख्यातयोगी नञ्, तत्र प्रतिषेधार्थत्वादभावालम्बनत्वं भवेत्। अत आह—यत्रापीति। आख्यातयोगिनो नञो निषेध्यहननादिक्रियारहितमुदासीनमात्मानं

---

**1** एवमिहापीति “तत्रापि” इत्यपिशब्देन ] $A_1G_1$; एवमिहापीत्यपिशब्देन $K_1$; एवमिहापीति तत्रापीत्यनेन शब्देन $S_1$ **1** दर्शयतीति ] $A_1G_1K_1$; दर्शयति $S_1$ **3** नञो ] $A_1G_1S_1$; नञो न $K_1$ **3** इव न ] $A_1G_1$; इव $K_1$; ईक्षण° $S_1$ **4** नामेति ] $A_1G_1S_1$; नामधात्वर्थयोगी च नैव नञ् प्रतिषेधकः $K_1$ **4** दृष्टान्तार्थमिति ] $A_1G_1K_1$; दृष्टान्तरार्थमिति $S_1$ **4** द्विधा च ] $A_1G_1$; विधा च $K_1$; द्वेधा $S_1$ **5** नामयोग्यन्य° ] $A_1G_1K_1$; नापिनञ्° $S_1$ **7** °कत्वमित्याह ] $A_1G_1K_1$; °क इत्याह $S_1$ **7** वदत इति ] em.; वदन्त इति $A_1G_1$; वदतो ब्राह्मणाधर्मावन्यमात्रविरोधिनौ $K_1$; वदतीति $S_1$ **8** वदति ] $S_1$; वदिति $A_1G_1K_1^{pc}$; विति $K_1^{ac}$ **8** धर्मविरोधिनम् ] $K_1S_1$; विरोधिनम् $A_1G_1$ **9** शब्द° ] $A_1G_1K_1$; धर्म° $S_1$ **10** °श्लेष° ] $A_1G_1K_1$; °श्लोक° $S_1$ **12** इत्यादावा° ] $A_1G_1K_1$; इत्यादाविवा° $S_1$ **12** °योगी नञ् ] $A_1G_1K_1$; °योगिन $S_1$ **13** यत्रापीति ] $A_1G_1S_1$; यत्राप्याख्यातसंबन्धात् प्रतिषेधः प्रतीयते तत्रौदासीन्यवस्त्वेव प्रतिपत्तावालंबते $K_1$(unmetrical) **14** °तयोगिनो ] $A_1G_1$; °यतयोगिनो $K_1$; °तयोगिनो पि $S_1$ **14** °हनना° ] $A_1G_1$; °वधपदता° $K_1^{ac}$; °वधपाना° $K_1^{pc}$; °पाना° $S_1$ **14** °मुदासीन° ] $A_1G_1K_1$; °मुपादान° $S_1$

प्रतिपत्ता पुरुषो ऽवलम्बते। तच्चौदासीन्यं वस्त्वेवेति न क्वचिदवस्त्वालम्बनत्वं नञ इति सिद्धमिति।

35a

एवमुपपादितं वस्तुगोचरत्वमपोहानामुपसंहरति—तस्मादिति। अवश्यं वस्तुविषयो ऽगवापोहो दर्शयितव्यः। न चेह भवन्मते तत्संभवति, असाधारणादीनां विषयत्वानुपपत्तेरुक्तत्वादिति भावः।

35bcd

दूषणान्तरमाह— अपि चेति। यदि वस्त्वात्मकसामान्यपरित्यागेनावस्त्वात्मकमेकं कल्प्यते, ततः परमाणुभ्यो ऽन्त्येभ्यो विशेषेभ्यः प्राङ्न किंचिद्वस्तु लभ्येत। द्व्यणुकरूपस्यापि द्वयोरपि साधारणस्यावस्तुत्वादिति भावः।

36ab

किमतो यद्येवम्। अत आह—न चेति। प्राक् तावद् अन्त्येभ्यो विशेषेभ्यो न किंचिद्वस्त्वस्ति। अन्त्यास्तु विशेषा न व्यवहाराङ्गमिति व्यवहारोच्छेदप्रसङ्गो भवेदिति।

36b

---

**4** °पादितं ] $K_1S_1$; °पादितम° $A_1G_1$ **4** °त्वमपोहानामु° ] $A_1G_1K_1$; °त्वमु° $S_1$ **4** तस्मादिति ] $A_1G_1S_1$; तस्मद्वस्तुन्यपोहाः स्युः $K_1$ **5** अवश्यं ] $A_1G_1K_1$; अवश्यं हि $S_1$ **5** दर्शयितव्यः ] $A_1G_1S_1$; प्रत्येतव्यः $K_1$ **5** न चेह ] $A_1G_1S_1$; न च $K_1$ **6** °दीनां ] $A_1G_1S_1$; °दीना $K_1$ **8** दूषणान्तरमाह—अपि चेति ] $A_1G_1S_1^{pc}$; दूषणान्तरमाह अपि चावस्तुकल्पने प्रागन्त्येभ्यो विशेषेभ्यो न किञ्चित् वस्तु लभ्यते $K_1$; om. $S_1^{ac}$ **9** °मेकं ] $A_1G_1S_1$; °मेव सामान्यं $K_1$ **9** कल्प्यते ] $A_1G_1K_1$; परिकल्प्यते $S_1$ **9** परमाणुभ्यो ] $A_1G_1K_1$; परमाणुनामभ्यो $S_1$ **9** ऽन्त्येभ्यो ] $A_1G_1S_1^{pc}$; न्त्य° $K_1$; न्त्ये $S_1^{ac}$ **10** लभ्येत ] $A_1G_1S_1$; लभ्य+ $K_1$ **10** द्व्यणुकरूपस्यापि ] $A_1G_1K_1$; om. $S_1$ **10** साधारणस्या° ] $A_1G_1K_1^{pc}S_1$; साधारस्यणस्या° $K_1^{ac}$ **11** °वस्तुत्वादिति ] $A_1G_1K_1$; °वस्तुत्वापातादिति $S_1$ **13** न चेति ] $A_1G_1S_1$; न चान्त्यैर्व्यवहारोस्ति $K_1$ **13** प्राक् तावद् ] $K_1S_1$; प्राकृतवद् $A_1G_1$ **14** °द्वस्त्वस्ति ] $A_1G_1S_1$; °द्वस्तु लभ्यतेति $K_1$ **14** अन्त्यास्तु ] $A_1G_1K_1$; अन्त्याश्च $S_1$

अन्त्यानामव्यवहाराङ्गत्वे कारणमाह—शक्यमिति। अतीन्द्रिया हि ते नाक्षजायां बुद्धौ भासन्ते। अन्यच्च किंचिन्नास्त्येवेति तदयं किमुपादाय चेष्टेत। अपि चैषां निरूपणमप्यशक्यम्। स्थूलोपलम्भान्यथानुपपत्तिप्रमाणिका हि ते न तदभावे निरूपयितुं शक्यन्त इति।

36cd

एवं चान्त्यानामपि विशेषाणामभावाद् अपोहवाचा शून्यतैव प्रकारान्तरेणोक्ता भवेदित्याह—अपोहेति।

37ab

तस्यां शून्यतायामश्वादिबुद्धयः स्वांशालम्बना एव भवेयुरित्याह—तस्यामिति।

37cd

तत्र चात्मांशग्रहणे वृथैवापोहस्य शब्दवाच्यत्वकल्पनमित्याह—तत्रेति।

38

एवं हि वरं प्रतिभासानुगुण्येन वस्तुरूपमेव सामान्यं बुद्ध्याकारः श-

**1** °राङ्गत्वे ] $A_1K_1S_1$; °राङ्गत्व° $G_1$ **1** शक्यमिति ] $A_1G_1S_1$; शक्यं नैषान्निरूपणम् $K_1$ **2** किंचिन्नास्त्येवेति ] $A_1G_1$; किञ्चिन्नास्तीति $K_1$; किंचन नास्त्येव $S_1$ **2** तदयं ] $A_1G_1K_1$; तदर्थं $S_1$ **3** किमुपादाय ] $A_1G_1K_1$; किमपादाय $S_1$ **4** °प्रमाणिका ] $A_1G_1$; °प्रमाणका $K_1S_1$ **4** न तदभावे ] $A_1G_1K_1$; तदभावे न $S_1$ **4** इति ] $A_1G_1S_1$; इति भावः $K_1$ **6** °भावाद् ] $A_1G_1K_1$; °भावादपोहाधारवस्त्वभावाद् $S_1$ **6** अपोहवाचा ] $S_1$; अपोहवाच्यता $A_1G_1K_1$ **7** °तैव प्रकारान्तरेणो° ] $A_1G_1S_1$; °तैवान्यप्रकारेणो° $K_1$ **7** अपोहेति ] $A_1G_1S_1$; अपोहशब्दवाच्या च शून्यतान्यप्रकारिका $K_1$ **9** तस्यां ] $A_1G_1S_1$; तस्याञ्च $K_1$ **9** एव ] $A_1G_1S_1$; om. $K_1$ **10** तस्यामिति ] $A_1G_1S_1$; तस्याञ्चाश्वादिबुद्धीनामात्मांशग्रहणं भवेत् $K_1$ **12** तत्र ] $A_1G_1K_1$; एवं $S_1$ **12** वृथैवापोहस्य शब्दवाच्यत्व° ] $A_1G_1S_1$; वृथापोह++++++ $K_1$ **12** °कल्पनमित्याह ] $A_1G_1K_1$; °कल्पनेत्याह $S_1$ **13** तत्रेति ] $A_1G_1S_1$; तत्रान्यापोहशून्यत्वम् मुधैवाभ्युपगम्यते $K_1$ **15** एवं हि ] $A_1G_1S_1$; एवञ्च $K_1$ **15** वस्तु° ] $A_1G_1K_1$; विधि° $S_1$

ब्दवाच्य इत्यङ्गीक्रियताम्, किमपोहकल्पनयेत्याह—सामान्यमिति। अर्थानपेक्षो बाह्यार्थानपेक्ष इत्यर्थः। अयं च पक्षः प्रागेवास्माभिरुपन्यस्य निराकृत इति न तन्निरासे प्रयस्यत इति।

39

स्यादेतत्। बुद्ध्यन्तरापोह एव शब्दार्थो भविष्यतीति। अत आह—वस्तुरूपेति। सर्वशब्दार्था हि गौरश्व इति वस्त्वाकारेणैव स्वशब्देभ्यो भासन्ते, नान्यापोहात्मना। तेन वस्तुरूप एव बुद्ध्याकारः शब्दार्थ इति वरं कल्पितम्, किमपोहवाच्यत्वपरिकल्पनया। न ह्यत्र बुद्ध्यन्तरापोहः शब्दादवगम्यत इति।

40

अङ्गीकृतस्तावद् बुद्धिशब्दार्थपक्षो वाक्येषु भवद्भिरिति पदेष्वपि तथैव कल्पना युक्तेत्याह—असतीति। वाक्यार्थो न बहिरस्तीति वाक्याधिकरणपूर्वपक्षे वक्ष्यते। तदभावाच्च प्रतिभैव संसर्गविच्छेदप्रतिभासा वाक्यार्थ इत्याक्षिप्तम्। एवमेव पदार्थो भविष्यतीति किमपोहकल्पनयेति।

---

**1 °क्रियताम्** ] $A_1G_1K_1$; °क्रितं $S_1$ **2 सामान्यमिति** ] $A_1G_1S_1$; सामान्यं वस्तुरूपं हि बुद्ध्याकारो भविष्यति $K_1$ **2 बाह्यार्था°** ] $A_1G_1K_1$; बाह्या° $S_1$ **2 प्रागेवा°** ] $A_1G_1K_1$; प्राग° $S_1$ **3 °भिरुपन्यस्य** ] $A_1G_1K_1$; °भिर् $S_1$ **3 न** ] $A_1G_1K_1$; नेह $S_1$ **3 प्रयस्यत** ] $A_1G_1K_1$; प्रयत्यत $S_1$ **5 °तीति** ] $A_1G_1$; °ति $K_1$; °तीत्युच्यते $S_1$ **6 वस्तुरूपेति** ] $A_1G_1$; वस्तुरूपा च सा बुद्धिः शब्दार्थेषूपजायते तेन वस्त्वेव कल्प्येत वाच्यं बुद्ध्यनपोहकम् $K_1$; वस्तुस्वरूपेति $S_1$ **6 सर्व°** ] $A_1G_1S_1$; सर्वे $K_1$ **6 गौरश्व** ] $A_1G_1$; गौरयमश्व $K_1$; गौरश्व पुरुष $S_1$ **7 वस्तुरूप** ] $A_1G_1K_1$; वस्तुस्वरूप $S_1$ **7 शब्दार्थ** ] $A_1G_1S_1$; शब्दवाच्य $K_1$ **8 °परिकल्पनया** ] $A_1G_1K_1$; °कल्पनया $S_1$ **11 °कृतस्तावद्** ] $A_1G_1$; °कृतश्चायं $K_1S_1$ **12 असतीति** ] $A_1G_1S_1$; असत्यपि च बाह्ये र्थे वाक्यार्थः प्रतिभा यथा पदार्थो पि तथैवं स्यात् किमपोहः प्रकल्प्यते $K_1$ **12 वाक्यार्थो न** ] em.; वाक्यार्थो न किञ्चित् $A_1G_1$; न वाक्यार्थो $K_1$; वाक्यार्थो न कश्चिद् $S_1$ **12 बहिरस्तीति** ] $A_1G_1K_1^{pc}S_1$; बहिरितिरस्तीति $K_1^{ac}$ **13 °प्रतिभासा** ] $A_1G_1K_1$; °निर्भासा $S_1$ **14 वाक्यार्थ** ] $A_1G_1S_1$; वाक्यार्थरूप $K_1$ **14 इत्याक्षिप्तम्** ] $A_1G_1$; इत्यादिकम् $K_1$; इत्याक्षितं $S_1$

41

यदि मन्यते—शक्यते खलु पदार्थः “अगौर् न भवतीति गौः” इति वक्तुम्, न त्वेवं वाक्यार्थ इति प्रतिभासरूप एवावसीयते। पदार्थस्त्वपोहरूप इति। तन्न, अगवापोहेन गवामप्रतीतेः। न हि गौरित्यतो बुद्ध्यन्तराद् व्यवच्छेदो बुद्धेरवसीयते बाह्यवादिन इवागोशब्दवाच्यात्कस्यचिद् बाह्यस्य। न च शब्दप्रयोगमात्रादेव शब्दार्थत्वमपोहस्य युक्तमाश्रयितुम्। यद्धि शब्दादुच्चरितादवगम्यते स शब्दार्थः। न चेह शाब्दी बुद्धिः स्वरूपोत्पादनमात्राद् अन्यमन्यनिवृत्त्यंशं बिभर्तीति यादृगस्याः स्वीयं रूपं तेनैवेयमुत्पद्यते। वस्त्वात्मनैव भासत इति यावत्। वस्त्वात्मकं हि तद्रूपम्। यच्चास्याः स्वरूपं तदेव प्रख्यायते। परेषामपि नाधिकं किंचित्। अतो वाक्यार्थवत्पदार्थोऽपि प्रतिभारूप एवेति युक्ता कल्पनेत्यभिप्रायेणाह—बुद्ध्यन्तरादिति।

42

---

**2 मन्यते** ] $A_1G_1K_1$; मन्येत $S_1$ **2 अगौर् न भवतीति** ] $A_1G_1K_1$; ऽगोरभावो $S_1$ **3 वक्तुम्** ] $A_1G_1K_1^{pc}$; om. $K_1^{ac}S_1$ **3 °र्थ इति** ] $A_1G_1$; °र्थ इति स $K_1$; °र्थ $S_1$ **3 एवावसीयते** ] $A_1G_1K_1$; एवाश्रीयते $S_1$ **4 °स्त्वपोहरूप** ] $A_1G_1S_1$; °स्त्वरूप $K_1$ **5 बाह्यवादिन** ] $A_1G_1K_1$; बाह्यादिन $S_1$ **5 इवागोशब्द°** ] $A_1G_1K_1S_1^{pc}$; इवा° $S_1^{ac}$ **6 शब्दार्थ°** ] $A_1G_1K_1$; शब्दवाच्य° $S_1$ **7 युक्तमाश्रयितुम्** ] $A_1G_1K_1$; युक्तं $S_1$ **7 यद्धि** ] $A_1G_1K_1$; यदि $S_1$ **7 स** ] $A_1G_1K_1$; om. $S_1$ **8 स्वरूपोत्पादनमात्राद्** ] $A_1G_1$; स्वरूपोत्पादमात्राद् $K_1$; स्वरूपोत्पादाद् $S_1$ **8 अन्यमन्य°** ] $A_1G_1S_1$; अन्यमन्यं $K_1$ **8 बिभर्तीति** ] $A_1G_1$; विभर्ति $K_1$; बिभर्ति $S_1$ **9 यादृगस्याः** ] $K_1S_1$; यादृशस्या° $A_1G_1$ **9 स्वीयं** ] $A_1G_1S_1$; स्व° $K_1$ **9 °त्पद्यते** ] $A_1G_1K_1^{pc}S_1$; °पपद्यते $K_1^{ac}$ **9 वस्त्वात्मनैव भासत** ] $A_1G_1$; ++++वस्त्ववभासत $K_1$; वस्त्वात्मनैवावभासत $S_1$ **10 यच्चा°** ] $A_1G_1K_1$; तच्चा° $S_1$ **10 °स्याः स्वरूपं** ] $A_1G_1K_1$; °स्या रूपं $S_1$ **10 प्रख्यायते** ] $A_1G_1K_1$; प्रत्याख्यायते $S_1$ **12 युक्ता** ] $A_1G_1K_1$; युक्ता वः $S_1$ **12 बुद्ध्यन्तरादिति** ] $A_1G_1S_1$; बुद्ध्यन्तराद्व्यवच्छेदो न च बुद्धेः प्रतीयते स्वरूपोत्पा++त्राच्च नान्यमंशं बिभबर्ति सा $K_1$(unmetrical)

दूषणान्तरमाह—भिन्नेति। ये तावद् गवाश्वादयो भिन्नसामान्यवचनाः शब्दा ये चैकैकद्रव्यनिवेशिनो विशेषवचना एव ते ऽपोहवाच्यत्वपक्षे पर्याया भवेयुः, एकार्थत्वात्। अपोहानामभावात्मनां स्वरूपभेदाभावादिति भावः।

43ab

अत्र चोदयति—नन्विति। अपोहाभेदे हि भवेदयं प्रसङ्गः। ते तु प्रत्यश्वादि भिद्यन्त एवेति वक्ष्यमाणाभिप्रायेण प्रत्यवस्थानमिति।

43cd

यदि त्ववान्तरभेदे ऽप्यपोहात्मनैकत्वमाश्रित्य प्रसङ्गो दीयते , तत्तवापि समानम्। शक्यते हि गोत्वादिसामान्यानामपि वस्तुत्वेनाभेदात् तच्छब्दानां पर्यायत्वमापादयितुमित्याह—सामान्येति।

44ab

परिहरति—भिद्यन्त इति। भेदो हि नाम वस्तुधर्मः, स वस्तुरूपसामान्यवादिना शक्यः सामान्येषु दर्शयितुम्। निवृत्तिस्त्वपोहरूपा कथं भिद्यते। एवं शशविषाणाकाशकुसुमयोरपि भेदो भवेदिति मह-

---

**14 भिन्नेति** ] $A_1G_1S_1$ ; भिन्नसामान्यवचना विशेषवचनाश्च ये सर्वे भवेयुः पर्याया यद्यपोहस्य वाच्यता $K_1$ **1 चैकै°** ] $K_1S_1$ ; वैकै° $A_1G_1$ **2 °भावात्मनां** ] $A_1G_1S_1$ ; °भावानाम् $K_1$ **3 °पभेदाभावा°** ] $A_1G_1S_1$ ; °पाभेदा° $K_1$ **5 नन्विति** ] $A_1G_1S_1$ ; ननु भेदादपोहानां प्रसंगो यन्न युज्यते $K_1$ **5 हि** ] $A_1G_1$ ; पि $K_1S_1$ **5 ते तु** ] $A_1G_1S_1$ ; ते $K_1$ **6 प्रत्यश्वादि** ] $A_1G_1$ ; प्रत्ययश्वोदि $K_1^{ac}$ ; प्रत्यश्वादि $K_1^{pc}$ ; प्रत्यश्वादिवद् $S_1$ **8 दीयते** ] $A_1G_1S_1$ ; वधीयते $K_1^{ac}$ ; भवदीधीयते $K_1^{pc}$ **9 तत्तवापि** ] $K_1S_1$ ; तत्तावपि $A_1G_1$ **9 गोत्वादि°** ] $A_1G_1K_1$ ; गवादि° $S_1$ **10 °भेदात् तच्छब्दानां** ] $A_1G_1K_1$ ; °भेदात् छब्दानां $S_1$ **10 सामान्येति** ] $A_1G_1S_1$ ; सामान्यापोहक्लृप्त्या चेद्वस्तुमात्रे समन्तव $K_1$ **12 भिद्यन्त इति** ] $A_1G_1S_1$ ; भिद्यन्ते मम वस्तुत्वात्सामान्यानि परस्परम् $K_1$ **12 वस्तुधर्मः** ] $A_1G_1K_1$ ; स्वरूपभेदः $S_1$ **12 स** ] $A_1G_1K_1$ ; स च $S_1$ **13 वस्तुरूप°** ] $A_1G_1K_1$ ; वस्तुस्वरूप° $S_1$ **13 शक्यः सामान्येषु** ] $A_1G_1S_1$ ; सामान्येषु शक्यो $K_1$ **13 °स्त्वपोह°** ] $A_1G_1K_1$ ; °स्त्ववस्तु° $S_1$ **14 भिद्यते** ] $A_1G_1$ ; भिद्यत $K_1$ ; भिद्येत $S_1$ **14 एवं** ] $A_1G_1$ ; एवं हि $K_1S_1$ **14 °णाकाश°** ] $A_1G_1K_1$ ; °णगगन° $S_1$

दन्तरमावयोरिति भावः।

44cd

न च स्वभावभिन्नानामपि सामान्यानां संसर्गिद्रव्याणामिवैकतापत्तिः, येन विशेषो न लक्ष्येत। असंकीर्णस्वभावानि हि तानि संभिन्नान्यपि नैकत्वं वितन्वते दर्शयन्तीति सिद्धो नः शब्दार्थभेद इत्याह—असंकीर्णेति।

45

तव तु न तावदवस्तुरूपाणामपोहानां स्वभावतो भेदः। न चान्यसंसर्गनिबन्धनो ऽसंसृष्टत्वाद् वस्तुधर्मत्वात्संसर्गस्य। अतो ऽपोहभेदाभावाद्दुष्परिहरं पर्यायत्वमित्यभिप्रायेणाह—संसृष्टेति।

वस्तुरूपसामान्यवादिनां हि स्वरूपाश्रयं सामान्यानामेकत्वम्, प्रतियोग्यपेक्षया च नानात्वम्। तव त्ववस्त्वात्मनां कथमेकता नानात्वं च भविष्यतीति संसृष्टादिविकल्परहितात्मनामपोहानां भेदो

---

**15** °मावयोरिति ] $A_1G_1K_1$; °मर्थयोरिति $S_1$ **2** °भिन्नानामपि ] $A_1G_1K_1$; °भिन्नानां $S_1$ **2** सामान्यानां ] $A_1G_1K_1$; सामान्यानामपि $S_1$ **2** संसर्गि° ] $K_1S_1$; संसर्गी $A_1G_1$ **3** °मिवैकतापत्तिः ] $S_1$; °मिव पुनरेकतापत्तिः $A_1G_1K_1$ **3** विशेषो ] $A_1G_1$; विवेको $K_1S_1$ **3** लक्ष्येत ] $A_1G_1$; लक्ष्यते $K_1S_1$ **3** हि ] $A_1G_1K_1$; om. $S_1$ **4** संभिन्नान्यपि ] $A_1G_1$; भिन्नान्यपि $K_1S_1$ **4** दर्शयन्तीति ] $A_1G_1S_1$; दर्शयतीति $K_1$ **5** असंकीर्णेति ] $A_1G_1S_1$; असंकीर्णस्वभानि न चैकत्वं वितन्वते $K_1$(unmetrical) **7** तावदवस्तु° ] $A_1G_1K_1$; तावदर्थस्व° $S_1$ **7** स्वभावतो ] $A_1G_1K_1$; स्वतो $S_1$ **7** न चान्य° ] $A_1G_1K_1$; नान्य° $S_1$ **8** वस्तुधर्म° ] $G_1K_1S_1$; वस्तुरूपाणामपोहानां स्वभावतो भेदो न चान्यसंसर्गनिबन्धनो ऽसंसृष्टत्वाद्वस्तुधर्म° $A_1$ **9** °ष्परिहरं ] $A_1^{pc}G_1K_1S_1$; °ष्परिहारं $A_1^{ac}$ **9** संसृष्टेति ] $A_1G_1S_1$; संसृष्टैकत्वनानात्वविकल्परिहितात्मनाम् अवस्तुत्वादपोहानां तव स्यात् भिन्नता कथम् $K_1$ **10** °रूप° ] $A_1G_1K_1$; °स्वरूप° $S_1$ **10** °न्यानामेक° ] $A_1G_1K_1$; °न्यात्मक° $S_1$ **11** °त्मनां ] $A_1G_1K_1$; °त्मकं $S_1$ **11** °मेकता ] $A_1G_1S_1$; °मेकत्वन् $K_1$ **12** नानात्वं च ] $A_1G_1K_1$; नानात्मता सं° $S_1$ **12** भविष्यतीति ] $A_1G_1S_1$; भविष्यति $K_1$ **12** °तात्मनाम° ] $A_1G_1K_1$; °तानाम° $S_1$ **12** °पोहानां ] $A_1G_1K_1$; °पोहानामंश° $S_1$

दुर्भणः। एकत्वोपन्यासो नानात्वानुगुणतया। स्वरूपेण ह्येकस्यान्यापेक्षया नानात्वं भवति। एकत्वं च संख्याविशेषो गुणः। नासाववस्त्वाश्रयः संभवति। तदभावाच्च भेदाभावः। ततश्च पर्यायत्वमिति भावः।

46ab

यदि त्वपोहस्यापि भेदो ऽभ्यूपेयते, ततो भिद्यमानत्वेनासाधारणवद्वस्तुत्वापत्तेः सद्रूपसामान्यप्रसङ्ग एवेत्यभिप्रायेणाह—यदि वेति।

46cd

अनिष्यमाणे तु वस्तुत्वे नानात्वाभावात् सैव पर्यायतेत्याह—अवस्तुत्व इति ।

47ab

पर इदानीं स्वाभिप्रायमाविष्करोति—ननु चेति। उक्तमिदं बौद्धैः—

तस्माद्यतो यतो ऽर्थानां व्यावृत्तिस्तन्निबन्धनाः।
वस्तुभेदाः। इति।

47cd

एवं चापोह्यभेदनिबन्धनापोहभेदाभ्युपगमादपर्यायत्वं शब्दानामि-

---

**12** *Pramāṇavārttika* 1.41 (=*Pramāṇaviniścaya* 57.6–7): तस्माद्यतो यतो ऽर्थानां व्यावृत्तिस्तन्निबन्धनाः। जातिभेदाः प्रकल्प्यन्ते तद्विशेषावगाहिनः॥

---

**13** दुर्भणः। एक॰ ] $A_1G_1K_1$; दर्शनात्मक॰ $S_1$ **1** ॰स्यान्यापेक्षया ] $A_1G_1K_1$; ॰स्यानपेक्षया $S_1$ **1** संख्याविशेषो ] $A_1G_1K_1$; संख्या ह्यशेषो नु॰ $S_1$ **2** संभवति ] $A_1G_1K_1$; संभवतीति $S_1$ **2** तदभावाच्च ] $A_1G_1S_1$; तदभेदाच्च $K_1$ **5** ततो ] $A_1G_1K_1$; om. $S_1$ **5** ॰मानत्वेना॰ ] $A_1G_1K_1$; ॰मानत्वेन $S_1$ **6** ॰पत्तेः स॰ ] $A_1G_1K_1$; ॰पत्तेस्त॰ $S_1$ **6** यदि वेति ] $A_1G_1$; यदि वा भिद्यमानत्वात् वस्त्वसाधारणांशवत् $K_1$; यदि चेति $S_1$ **8** तु ] $A_1G_1$; om. $K_1S_1$ **8** ॰भावात् सैव ] $A_1G_1K_1$; ॰भाव उक्त एव $S_1$ **8** पर्यायतेत्याह ] $A_1G_1K_1$; पर्यायताप्रसंग इत्याह $S_1$ **9** अवस्तुत्व इति ] $A_1G_1S_1$; अवस्तुत्वादपोहानां तव स्यात् भिन्नता कथम् $K_1$ **11** पर ] $A_1G_1K_1$; अपर $S_1$ **11** ननु चेति ] $A_1G_1S_1$; ननु चापोह्यभेदेन भेदो पोहस्य सेत्स्यति $K_1$ **12** तस्माद्यतो ] $A_1G_1K_1$; यतो $S_1$

त्येतदपि दूषयति—स्वत इति। स्वाभाविकस्तावदपोहानां भेदो नास्ति। परतस्तु भवन्नौपचारिको भवेत्। यथा त्वमेव नः पिता माता चेति। न चैवंविधेन भेदेन पर्यायतापत्तिः परिह्रियते। एवं हि सर्वो ऽयं शाब्दो व्यवहार औपचारिको भवेत्, क्वचिदपि वास्तवस्य भेदस्याभावादिति।

ननु च मीमांसकानामपि निषेध्यभेदनिबन्धन एव निषेधभेदः, अनुपाश्रिते तस्मिंस्तद्भेदानवसायात्।

मैवम्। वस्तुरूपो हि नो ऽभावः, न परेषामिव निःस्वभावः। स च स्वयमपि भिन्न एव। अन्यो हि गवासंकरो ऽश्वे, अन्यश्च गव्यश्वासंकरः, रूपादिधर्मान्तरवद् भिन्न एव। निषेध्यभेदेन तु तद्भेदः स्फुटो व्यज्यते, न त्वसन्नेव जन्यते। निःस्वभावाभाववादिनां तु कस्यापोह्यभेदनिबन्धनो भेदो भविष्यतीति।

48ab

येनैव च प्रकारेणापोह्यभेदनिबन्धनो नापोह्यस्य भेदः, तेनैवापोहा-

---

**1** **शब्दानामित्येतदपि** ] $A_1G_1K_1$ ; **शब्दानामेतदपि** $S_1$ **1** **स्वत इति** ] $A_1G_1$ ; **स्वतस्तावदभेद स्यात् परतस्त्वौपचारिकः** $K_1$ ; **नेति** $S_1$ **2** **परतस्तु** ] $A_1G_1K_1$ ; **परतस्तद्°** $S_1$ **2** **नः** ] $K_1S_1$ ; **न** $A_1G_1$ **3** **न चैवं°** ] $A_1G_1K_1$ ; **न त्वेवं°** $S_1$ **3** **पर्यायता°** ] $A_1G_1S_1$ ; **पर्यायत्वा°** $K_1$ **4** **शाब्दो** ] $G_1K_1$ ; **शब्दो** $A_1$ ; **शाब्द°** $S_1$ **4** **व्यवहार** ] $A_1G_1K_1$ ; **व्यवहारभेद** $S_1$ **6** **ननु च** ] $A_1G_1K_1$ ; **ननु** $S_1$ **6** **°कानामपि** ] $A_1G_1K_1$ ; **°कानां** $S_1$ **8** **मैवम्** ] $A_1G_1S_1$ ; **मा मैवम्** $K_1$ **9** **एव** ] $A_1G_1S_1$ ; **एवेति** $K_1$ **10** **अन्यश्च गव्यश्वासंकरः** ] $A_1G_1$ ; **अन्यश्चाश्वासंकरो गवि** $K_1$ ; **गवि चाश्वासंकरो** $S_1$ **10** **रूपादि°** ] $A_1G_1K_1$ ; **पादि°** $S_1$ **10** **तु** ] $A_1G_1K_1$ ; om. $S_1$ **11** **°दः स्फुटो** ] $A_1G_1$ ; **°द स्फुतं** $K_1S_1$ **11** **व्यज्यते** ] $A_1G_1S_1$ ; **व्यज्यते नान्यभेदो न्यभेदमापादयितुमलमिति भावः** $K_1$ **11** **जन्यते** ] $A_1G_1K_1^{pc}$ ; **जन्यतेति** $K_1^{ac}$ ; **कल्प्यते** $S_1$ **11** **निःस्वभावाभाव°** ] $A_1G_1K_1$ ; **निःस्वभाव°** $S_1$ **12** **तु** ] $A_1G_1K_1$ ; **तत्** $S_1$ **12** **भेदो** ] $A_1G_1K_1$ ; om. $S_1$ **14** **च प्रकारेणा°** ] $A_1G_1$ ; **च कारणेना°** $K_1$ ; **कारणेना°** $S_1$ **14** **तेनैवा°** ] $A_1G_1$ ; **तेनैव चा°** $K_1$ ; **तेना°** $S_1$

धारभेदनिबन्धनो ऽपि भेदो नास्तीत्याह—तेनैवेति।

48cd

नान्यभेदो ऽन्यभेदमापादयितुमलमिति भावः। संबन्धिभेदो हि न वस्तुनो ऽपि भेदमापादयति देशभेद इव देवदत्तस्य। किमुतावस्तुनो ऽपोहस्यापादयिष्यतीत्यभिप्रायेणाह—न हीति।

49

अभिप्रायं विवृणोति—किमुतेति। यत एवावस्तु, अत एव न केनचित्संसृष्टम्, असंसर्गादेव च नान्यतो निवर्तितम्, ततश्चानवाप्तविशेषांशं यत्किमित्यनेन रूपेणानिरूपितम्, कथमिव तत्संबन्धिभेदाद् भिन्नं भविष्यति। मणयो हि सादृश्यात् स्वयमनुपलक्ष्यमाणविशेषा अपि नानारूपादिगुणसंबन्धाद् भिन्ना भासन्त इति तावद्युक्तम्। अस्ति हि तेषामुपाधिसंनिधानलक्षणः संसर्गो वस्तुरूपाणाम्, संसर्गाच्च कृष्णोपहितमण्यन्तरेभ्यो निवृत्तिः। परस्परव्यावृत्त्या च "अयमरुणः" "अयं कृष्णः" इति विशेषावाप्तिरिति युक्तमौपाधिकत्वं तेषु। न चायमवस्तुरूपाणामपोहानां विधिरस्तीति न तत्प्रकारजुषामपि

**1** °धारभेद° ] $A_1G_1$; °धार° $K_1S_1$ **1** ऽपि ] $A_1G_1S_1$; om. $K_1$ **1** नास्तीत्याह ] $A_1G_1K_1$; नास्तीत्यभिप्रायेणाह $S_1$ **1** तेनैवेति ] $A_1G_1S_1$; तेनैवाधारभेदेनाप्यस्य भेदो न युज्यते $K_1$ **3** हि ] $A_1G_1K_1$; पि $S_1$ **4** ऽपि ] $A_1G_1K_1$; om. $S_1$ **5** न हीति ] $A_1G_1S_1$; न हि संबन्धिभेदेन भेदो वस्तुन्यपीष्यते $K_1$ **7** किमुतेति ] $A_1G_1S_1$; किमुतावस्त्वसंसृष्टमन्यतश्चानिवर्तितम् अनवाप्तविशेषांशम् यत् किमित्यनिरूपितम् $K_1$ **7** यत एवावस्तु, अत एव ] $K_1$; यत एव वस्तु अत एव $A_1G_1$; यत एवावस्तुत एव $S_1$ **8** च ] $A_1G_1K_1$; om. $S_1$ **8** निवर्तितम् ] $A_1G_1S_1$; व्यावर्तितम् $K_1$ **9** °विशेषांशं ] $A_1G_1K_1$; °विशेषाशं $S_1$ **9** यत्किमित्यनेन ] $A_1G_1$; कमिदमित्यनेन $K_1S_1$ **9** रूपेणा° ] $G_1K_1S_1$; स्वरूपेण $A_1$ **10** स्वयमनुप° ] $A_1G_1K_1$; स्वयं $S_1$ **11** नानारूपादि° ] $A_1G_1K_1$; नारुणादि° $S_1$ **11** °संबन्धाद् ] $A_1G_1$; °संबन्धिभेदात् $K_1$; °संबन्धभेदाद् $S_1$ **12** °पाधि° ] $A_1G_1$; °पाधिभिः $K_1S_1$ **13** °च्च कृष्णो° ] $S_1$; °च्चतुष्पाद्यु° $A_1G_1$; °च्च कृष्णाद्यु° $K_1$ **14** इति विशेषा° ] $A_1G_1K_1$; इत्यशेषा° $S_1$ **14** युक्तमौपा° ] $A_1G_1K_1$; युक्तं ह्यौपा° $S_1$

भेदभाजनत्वमिति। संबन्धिभेदनिबन्धने चापोहभेद इष्यमाणे प्रतिशाबलेयादिपिण्डमपोहभेदो भवेत्। एवं च वक्ष्यमाणदोषापात इति न नूनमस्य तद्भेदादुपेयो ऽपोहस्य भेदः।

50

एवं च यथैवायं पिण्डभेदे ऽपि न भिन्नः, तथैवापोह्यभेदे ऽपि न भेत्तुमर्हतीत्याह—तस्मादिति।

51

यदि तु मा भूदेष प्रसङ्ग इति प्रतिपिण्डमपोहभेदः संगीयते, तथा सति शाबलेयादीनां सामान्यमपोहो गोशब्दवाच्य इति यदिष्टं तन्न स्यात्। कथं हि प्रतिपिण्डं भिन्नं सामान्यं भवेदित्या शङ्कया सहाह—भेद इति।

52

परोपाधिको ऽपि चास्याधारभेदादेव भेदो न्याय्यः। अस्ति तावत्तस्य तैस् तेषु प्रतिभासमानस्य संसर्गः। संसर्गाच्चापोहं भिन्दन्तीति युज्येतापि। यं पुनः संसर्गिणो ऽप्याधारा न भिन्दन्ति, कथमिव

---

**1** ◦भेदनिबन्धने ] $A_1G_1S_1$; ◦भेदेन $K_1$ **1** चापोहभेद ] $A_1G_1S_1$; चापोहस्य $K_1$ **2** एवं च ] $A_1G_1K_1$; एवं $S_1$ **3** ◦दादुपेयो ] $A_1G_1$; ◦दात् $K_1$; ◦दादुपेक्ष्यो $S_1$ **3** ऽपोहस्य ] $A_1G_1K_1$; om. $S_1$ **5** च यथै◦ ] $A_1G_1K_1$; चेत्कथै◦ $S_1$ **5** न ] $A_1G_1K_1$; om. $S_1$ **6** तस्मादिति ] $A_1G_1S_1$; तस्मात् यथैव +++पिण्डानान्नैष भिद्यते तथैवापोह्यभेदे पि नानेको यं भविष्यति $K_1$ **8** प्रति◦ ] $A_1G_1S_1$; प्रतिशाबलेयादि◦ $K_1$ **9** सामान्यमपोहो ] $A_1G_1K_1$; सामान्यमगौर्हि $S_1$ **10** इति यदिष्टं तन्न स्यात् ] $A_1G_1K_1$; इत्यादृष्टं तन्निषेध्येत $S_1$ **10** प्रतिपिण्डं ] $K_1S_1$; प्रतिपिण्ड◦ $A_1G_1$ **10** सामान्यं भवेदित्या◦ ] $A_1G_1S_1$; +++++++ $K_1$ **11** भेद इति ] $A_1G_1S_1$; भेदो वा प्रतिपिण्डं स्यात् अगोपोहस्तथा सति सामान्यं शाबलेयादेरिति नेष्टं प्रसिध्यति $K_1$ **14** तावत्तस्य तैस् ] $A_1G_1K_1$; तावदस्य $S_1$ **14** ◦भासमानस्य ] $A_1G_1S_1^{pc}$; ◦भासमानस्य तैस् $K_1$; ◦भासमानेषु $S_1^{ac}$ **15** युज्येतापि। यं ] $A_1G_1S_1$; ++++ $K_1$ **15** ऽप्या◦ ] $A_1G_1K_1$; स्या◦ $S_1$

तमसंबद्धा एवैकान्ततस्ततो बहिर्भूता एवापोह्या भेत्स्यन्तीत्यतिशयिता कल्पनेति सापहासमाह— संसर्गिण इति।

53–54

दूषणान्तरमाह—अगवीति द्वयेन। अयमर्थः। यद्यपोह्यभेदनिबन्धनो ऽपोहभेदः, ततो ऽगवि गोरपोह्ये ऽश्वस्यातिरेको भवेत्। यश्चाश्वस्यापोह्यो ऽनश्वः स गवाधिकः, गौस्तत्राधिको ऽपोह्यतयागोरपोह्यात्, तस्यात्मापोहासंभवात्। गवाश्वातिरिक्तं तु यच्छेषमपोह्यं तद्द्वयोरपि गवाश्वयोरभिन्नम्। खरवानरकरिवराहादिर्हि शेषो ऽपोह्यगणः स द्वयोरपि समान एव।

तदस्यां विषयशुद्धौ विचारयामः—किमेकापोह्यभेदादनयोर्भेदो भवतु, बहूनां वा हस्त्यादीनामपोह्यानामभेदादभेद इति। तदिह "विप्रतिषिद्धधर्मसमवाये भूयसां स्यात्सधर्मत्वम्" इत्यधिकरणसिद्धान्तानुसारेणाभेद एव न्याय्यः। तत्र हि पञ्चदशरात्रमुदाहृत्याल्प-

---

**1** °बद्धा ] $S_1$; °बन्धा $A_1G_1K_1$ **1** एवापोह्या ] $A_1G_1K_1$; अपोह्या $S_1$ **1** भेत्स्यन्ती° ] $A_1G_1S_1$; भेत्स्यती° $K_1$ **2** सापहास° ] $A_1G_1K_1$; सो पहास° $S_1$ **2** संसर्गिण इति ] $A_1G_1$; संसर्गिणो पि चाधारा यन्न भिन्दन्ति रूपतः अपोह्यैस्स बहिस्संस्थैर्भिद्येतेत्यतिकल्पना $K_1$; संसर्गेति $S_1$ **4** अगवीति द्वयेन ] $A_1G_1S_1$; अगव्यश्वातिरेकस्स्यात् अनश्वश्च गवाधिकः शेषं हस्त्याद्यपोहस्तु द्वयोरपि न भिद्यते तत्रैकभेदात् भेदो स्तु बह्वभेदादभिन्नता भूयसां स्यात् सधर्मत्वमित्यभेदः प्रसज्यते $K_1$ **4** अयमर्थः ] $A_1G_1S_1$; अस्यार्थः $K_1$ **4** यद्यपोह्यभेद° ] $A_1G_1K_1$; यदपोह्य° $S_1$ **5** ततो ] $A_1G_1S_1$; अतो $K_1$ **5** भवेत् ] $A_1G_1K_1$; भवति $S_1$ **6** गवाधिकः ] $K_1$; गवादधिको $A_1G_1$; चावाधको $S_1$ **7** °यागोरपोह्यात् ] $K_1S_1$; °यागोरपोह्यता स्यात् $A_1G_1$ **8** गवाश्वयोर° ] $A_1G_1S_1$; गवाश्वयोरप्य° $K_1$ **8** खरवानर° ] $A_1G_1K_1$; नरवानर° $S_1$ **8** °र्हि शेषो ] $A_1G_1K_1$; °र्विशेषो $S_1$ **9** ऽपोह्यगणः ] $A_1G_1$; ह्यगणः $K_1$; पोह्यमानो $S_1$ **9** स द्वयोरपि ] $K_1$; सद्द्वयोरपि $A_1G_1$; द्वयोरपि $S_1$ **11** तदिह "वि° ] $G_1K_1$; तदिष वि° $A_1$; तदिह $S_1$ **12** °समवाये ] $A_1G_1S_1$; °समवाय $K_1$ **13** °तानुसारेणा° ] $A_1G_1K_1$; °तन्यायेना° $S_1$ **13** तत्र हि ] $A_1G_1$; तत्र $K_1$; तात्र हि $S_1$

भूयसामह्नां धर्मविप्रतिपत्तिदशायां भूयसां धर्माणामनुग्रहो न्याय्य इति वक्ष्यति। ऐन्द्री हि तत्र सुब्रह्मण्या बहूनां धर्मो भविष्यति, नाल्पधर्म आग्नेयी। एवमिहापि बहूनामपोह्यानामभेदादभेद एव न्याय्यः, नाल्पभेदाद् भेदः। यस्य ह्यपोह्यभेदाद् अपोहभेदः, तस्य तदभेदादभेदो ऽपि युक्त एव। भेदाभेदविप्रतिपत्तावपि भूयसां धर्मानुग्रहादभेद एवायं रमणीय इति गवाश्वयोरेकतापत्तिरिति।

55

अपि चास्मिन्न्याये सति गौरश्वापोह्य एव न भवति। हस्त्याद्यपोह्यात्मना नासावश्वरूपाद्विशिष्यते यतः। हस्त्याद्यपोह्यो हि गौः, तादृशश्चाश्व इति को ऽनयोर्विशेषः। एवं सत्यपि यदि गवाश्वो ऽपोह्येत, ततो हस्त्याद्यपोह्यात्मना यदैकरूप्यमवगतं तद्विरुध्येत। तथापि चापोहे स्वात्मानमप्यपोहेत। न चैतन्न्याय्यमित्यभिप्रायेणाह—गौरिति।

56ab

अपि च य एव कश्चिद्गवादीनामन्यतमः शब्दः प्रतियोगिनं गृहीत्वा-

---

**1** °पत्तिदशायां ] $A_1G_1$; °पत्तौ $K_1S_1$ **1** धर्माणामनुग्रहो ] $A_1G_1$; धर्मानुग्रहो $K_1S_1$ **1** न्याय्य ] $G_1S_1$; न्यान्य $A_1$; न्यय्यो भवति $K_1$ **2** °ह्मण्या बहूनां ] $A_1G_1S_1$; °ह्मण्यस्य भूयसान् $K_1$ **4** नाल्पभेदाद् ] $A_1G_1K_1$; नान्यभेदाद् $S_1$ **5** °दभेदो ] $A_1G_1K_1$; °दभेदे $S_1$ **5** युक्त एव ] $A_1G_1K_1$; युक्तं $S_1$ **6** °ग्रहादभेद ] $A_1G_1K_1$; °ग्रहायाभेद $S_1$ **6** एवायं रमणीय ] $A_1G_1$; एवाश्रयणीय $K_1$; आश्रय $S_1$ **8** °रश्वापोह्य ] $A_1G_1K_1$; °रश्वो पोह्य $S_1$ **8** भवति ] $A_1G_1K_1$; भवति स्वस्मादनपोहः $S_1$ **9** हस्त्याद्यपोह्या° ] $A_1G_1K_1$; हस्त्याद्यपोहा° $S_1$ **9** हस्त्याद्यपोह्यो ] $A_1G_1$; हस्त्याद्यपोहो $K_1S_1$ **10** को ऽनयोर्विशेषः ] $A_1G_1K_1$; om. $S_1$ **10** एवं सत्यपि ] $A_1G_1K_1$; एवं सत्यपि च $S_1$ **11** ऽपोह्येत ] $A_1G_1K_1$; पोह्यते $S_1$ **11** ततो ] $A_1G_1S_1$; अतो $K_1$ **11** हस्त्याद्यपोह्यात्मना ] $A_1G_1K_1$; हस्त्याद्यपोहात्मना $S_1$ **11** °रुध्येत ] $A_1G_1S_1$; °रुध्यते $K_1$ **12** चापोहे स्वात्मानमप्यपोहेत ] $K_1$; वापोहे स्वात्मानमप्यपोहेत $A_1G_1$; चापोहेत $S_1$ **12** न चैत° ] $A_1G_1$; न च त° $K_1$; नैत° $S_1$ **13** गौरिति ] $A_1G_1S_1$; गौश्च हस्त्याद्यपोहेन नाश्वरूपाद्विशिष्यते करोति तदपोहञ्चेत् ऐकरूप्यं विरुध्यते $K_1$

लोच्यते, तस्यैव बहूनामपोह्यानामन्योन्यसाधारण्याद् एकैकमेवापोह्यमधिकमवशिष्टं भवति। गोरश्वस्तस्य च गौरिति सर्वस्य स्वात्मा नापोह्य इति स प्रतियोगिनो ऽतिरिचियत इत्याह—सर्वेति।

56cd

एवं चासाधारण्येन य एवासावधिकः, तन्मात्रापोह्यतैव सर्वत्र भवेत्। हस्त्यादयो ह्यश्वस्यापोह्या इति न गोरेवासाधारणाः। अश्वस्तु नाश्वस्यापोह्य इति स गोरसाधारणो भवति। अगौरित्यपि स एव वक्तव्यः, हस्त्यादीनामनश्व इत्यप्यभिधानसंभवात्। अश्वस्तु नानश्व इत्यभिधातुं शक्यत इति स एवासाधारण्येनागौरिति व्यपदेशमर्हतीत्यभिप्रायेणाह—तत्रेति।

57

तत्र को दोषः। अत आह—तत इति। अगवापोहे हि गोरसाधारणे "नाश्वो गौः" इत्यश्वापोहरूप एव गौरवतिष्ठते। तच्चेदमश्वापोहरूपत्वं सिंहादीनामप्यविशिष्टमिति ते ऽपि तन्निमित्तमगोपोहं बिभ्राणा

---

**2** गोर॰ ] $K_1$; गौर॰ $A_1G_1S_1$ **2** गौरिति ] $A_1G_1$; गौः $K_1S_1$ **3** स्वात्मा नापोह्य ] $A_1G_1$; स्वात्मा नापो+त $K_1$; स्वात्मनापोह्यते $S_1$ **3** सर्वेति ] $A_1G_1S_1$; सर्वशब्देषु चैकैकमपोहमवशिष्यते $K_1$ **5** एवासावधिकः ] $A_1G_1S_1$; एवाधिकः $K_1$ **5** सर्वत्र ] $A_1G_1K_1$; om. $S_1$ **6** गोरेवा॰ ] $K_1S_1$; गौरेवा॰ $A_1G_1$ **7** नाश्वस्यापोह्य ] $A_1G_1K_1$; नाश्वापोह्य $S_1$ **7** गोरसा॰ ] $S_1$; गौरसा॰ $A_1G_1$; गौरोस्सा॰ $K_1$ **7** अगौरि॰ ] $A_1G_1K_1$; अगोरि॰ $S_1$ **8** इत्यप्य॰ ] $A_1G_1S_1$; इत्य॰ $K_1$ **9** ॰धारण्येना॰ ] $A_1G_1K_1$; ॰धारणेना॰ $S_1$ **10** तत्रेति ] $A_1G_1S_1$; तत्र साधारणत्वेन तन्मात्रापोह्यता भवेत् $K_1$ **12** तत इति ] $A_1G_1S_1$; ततो श्वापोहरूपत्वात् सिंहादिः सर्व एव ते तन्निमित्तमगोपोहं बिभ्रदुच्येत गौरिति $K_1$ **12** अगवापोहे ] $A_1G_1$; अगोपोहे $K_1$; अगवापोहो $S_1$ **12** हि गोरसा॰ ] $A_1G_1K_1$; हि गौरसा॰ $S_1$ **12** ॰धाराणे ] em.; ॰धारण्ये $A_1G_1K_1S_1$ **13** ॰ण्ये "नाश्वो ] $A_1G_1K_1$; ॰ण्येन वा वाश्वो $S_1$ **13** ॰पोहरूप ] $A_1G_1S_1$; ॰पोहे हि गोरसाधारण्ये नाश्वो गौरित्यश्वापोहरूप $K_1$ **13** तच्चेदम॰ ] $A_1G_1K_1$; तच्चा॰ $S_1$ **14** ते ऽपि ] $A_1G_1K_1^{pc}S_1$; om. $K_1^{ac}$ **14** बिभ्राणा ] $A_1^{pc}G_1S_1$; बिभ्रमाणा $A_1^{ac}$; विभ्राणा $K_1$

गौरित्युच्येरन्। तन्निमित्तमित्यश्वापोहरूपत्वनिमित्तमित्यर्थः।

58a

यदि तूच्यते—सत्यम्। द्वयोरालोच्यमाने भवत्येतत्। सर्वत्र तु सर्वापोहं संगिरामहे। अगोपोहेन तु गव्यवसीयमाने सिंहादयो ऽप्यश्ववदपोह्यतयावसीयन्त एव। अतः कथं ते गावो भवेयुः। अत एवाल्पभूयस्त्वकारितो ऽपि न विशेषः, सर्वत्र सर्वापोहात्। न हि गोरश्वो हस्त्यादयश्च भेदेनापोह्याः, यदसौ बहूनामभेदादभिन्नो भवेत्। युगपदेव हि तस्य सर्व एवाश्वहस्त्यादयो ऽपोह्या इति। कथं विप्रतिषिद्धधर्मन्यायेन गवाश्वयोरभेद आपाद्यत इत्याशङ्कते तावत्—सर्वेति।

58b

एतदपि दूषयितुं विकल्पयति—स इति। स खलु सर्वापोहः प्रत्येकरूपेण वा स्यात् सामान्यरूपेण वा। उभयथापि न संभवतीति वक्ष्यमाणो ऽभिप्राय इति।

58cd

तत्र प्रत्येकपक्षे तावद्दूषणमाह—यदीति। अनन्ता ह्यजातातिवृत्तप्र-

---

**1 तन्निमित्तमित्य॰** ] $A_1G_1K_1$; तन्निमित्तमिति को र्थः अ॰ $S_1$ **1 ॰रूपत्व॰** ] em.; ॰रूपत्वं $A_1G_1$; ॰रूप॰ $K_1S_1$ **3 ॰ने भवत्येतत्** ] $A_1G_1$; ॰नयो भवत्येतत् $K_1$; ॰ने भवेत्तत् $S_1$ **3 तु** ] $A_1G_1$; om. $K_1S_1$ **4 तु गव्य॰** ] $A_1G_1$; गव्य॰ $K_1$; तु शक्यत्वे $S_1$ **6 एवाल्प॰** ] $A_1G_1K_1$; एवाल्पीयस्त्व॰ $S_1$ **7 गोरश्वो** ] $A_1G_1K_1^{pc}S_1$; गोरश्वयो $K_1^{ac}$ **7 ॰भिन्नो** ] $A_1G_1K_1$; ॰भेदो $S_1$ **8 हि** ] $A_1G_1S_1$; om. $K_1$ **8 कथं** ] $A_1G_1K_1$; om. $S_1$ **9 ॰न्यायेन** ] $A_1G_1K_1$; ॰न्याये हि $S_1$ **9 आपाद्यत** ] $A_1G_1$; आपद्यत $K_1$; आपद्येत $S_1$ **9 इत्याशङ्कते** ] $A_1G_1K_1$; om. $S_1$ **10 सर्वेति** ] $A_1G_1$; सर्वापोहो यदीष्येत $K_1$; सर्वत्रेति $S_1$ **12 स इति** ] $A_1G_1S_1$; स वक्तव्यः कथं पुनः $K_1$ **13 प्रत्येक॰** ] $A_1G_1K_1$; सत्येक॰ $S_1$ **13 सामान्यरूपेण वा** ] $A_1G_1$; सामान्यरूपेण वा स्याद् $K_1$; सामान्येन वा $S_1$ **14 ऽभिप्राय** ] $A_1G_1K_1$; न्याय $S_1$ **16 ॰दूषण॰** ] $A_1G_1$; ॰द्दोष॰ $K_1S_1$ **16 यदीति** ] $A_1G_1S_1$; यदि प्रत्येकरूपेण नापोह्यानन्त्यतो भवेत् $K_1$

त्युत्पन्नात्मानो ऽपोह्याः। तेषु प्रत्येकमपोह्यमानेष्वेकशब्दार्थावसाय एवायुः पर्यवस्येदिति।

59ab

अत्रैव दूषणान्तरमाह—भिन्नत्वादिति। अपोह्यभेदनिबन्धनो ऽपोहभेद इत्युक्तम्। प्रत्येकापोहपक्षे चापोह्यानां भेदादपोहभेदो दुर्वार इति।

59cd

तत्र को दोषः। अत आह—तत्रेति। एकस्मिन्नेव शाबलेयाद्यन्यतमे पिण्डे ऽनन्तानां जातीनां समवायो भवेदिति।

60ab

एवं चैकं गोशब्दवाच्यं सामान्यमिति व्याहतमित्याह—तत इति।

60cd

अपोहरूपत्वाच्च जातीनां तद्भेदादेकस्मिन्नपि पिण्डे जात्यन्तरेष्विवाश्वादिषु गोशब्दार्थेष्वप्यनेकगोशब्दार्थापेक्षया जात्यन्तरमतिर्भवेदित्याह—जात्यन्तरेति।

61ab

**1** °वसाय ] $A_1G_1S_1$; °वधारण $K_1$ **2** एवायुः पर्यवस्येदिति ] $A_1G_1$; एवायुःपर्यवसानम् भवेदिति $K_1$; एवायुषः पर्यवसानं भवेदिति $S_1$ **4** भिन्नत्वादिति ] $A_1G_1S_1$; भिन्नत्वाच्चाप्यपोह्यानां भिन्नो पोह्यः प्रसज्यते $K_1$ **5** ऽपोह° ] $A_1G_1$; ह्यपोह्य° $K_1$; ह्यपोह° $S_1$ **5** °कापोह° ] $K_1S_1$; °कापोह्य° $A_1G_1$ **8** दोषः। अत ] $A_1G_1K_1$; दोष इत्यत $S_1$ **8** तत्रेति ] $A_1G_1S_1$; तत्रैकस्मिन् भवेत्पिण्डे नन्तजातिसमन्वयः $K_1$ **8** एकस्मिन्नेव ] $A_1G_1S_1$; एकस्मिन्नपि $K_1$ **8** शाबलेयाद्यन्यतमे ] $A_1G_1K_1$; शाबलेये यावदन्यतमे $S_1$ **9** ऽनन्तानां जातीनां ] $A_1G_1S_1$; नन्तजातीनां $K_1$ **9** समवायो ] $A_1G_1$; समबायो $K_1$; समुच्चयो $S_1$ **11** व्याहत° ] $A_1G_1K_1$; च्युत° $S_1$ **11** तत इति ] $A_1G_1S_1$; ततो गौरिति सामान्यं वाच्यमेकं न सिध्यति $K_1$ **13** °न्नपि ] $A_1G_1K_1$; °न्नेव $S_1$ **14** °ष्वप्यनेक° ] $S_1$; °ष्वप्येक° $A_1G_1K_1$ **15** जात्यन्तरेति ] $A_1G_1S_1$; जात्यन्तरमतिश्चैषु तत्रैतस्मिन् प्रसंगे द्वयमप्यतदपोहकर्माधारात्मकमन्त्येष्वेव परमाणुषु भवेज्जात्यन्तरेष्विव $K_1$(unmetrical)

स्यादेतत्। प्रत्येकापोहपक्षे भवेयुरेते दोषाः। समुदायात्मना तु सर्वापोहं वक्ष्यामः। तत्र च स्वरूपभेदे ऽप्यगवादीनाम् अपोहनक्रियाकर्मतयैकत्वान्नापोह्यभेदकारिता दोषा भविष्यन्तीत्यत आह—समुदायेति।

61cd

अत्र कारणमाह—समुदाय इति। एकेन हि केनचिद्देशादिना धर्मेण वनादिषु समुदाया दृष्टाः।

62ab

न चेह तथा संभवतीत्यसंभवमेव दर्शयति—नापीति।

62cd

अपि चायमपोह्यसमुदायः समुदायिभ्यो भिन्नो वा स्यादभिन्नो वा। न तावद् भिन्नो बौद्धैरिष्यत इत्याह—व्यतिरिक्त इति।

63ab

अव्यतिरेके तु समुदायिनामेव तत्त्वात् तेषां चानन्त्यात् तदवस्थमानन्त्यमित्याह—यदीति।

63cd

---

**1** प्रत्येकापोह° ] $A_1G_1K_1$ ; प्रत्येक° $S_1$ **2** स्वरूपभेदे ऽप्य° ] $A_1G_1S_1$ ; ++ +++++ $K_1$ **3** °कर्मतयैकत्वान्ना° ] $S_1$ ; °कर्मतैकत्वान° $A_1G_1K_1$ **3** °पोह्यभेद° ] $A_1G_1K_1S_1^{pc}$ ; °पोह्य° $S_1^{ac}$ **4** समुदायेति ] $A_1G_1S_1$ ; समुदायात्मना नापि भवेदेषामपोह्यता $K_1$ **6** अत्र ] $A_1G_1S_1$ ; तत्र $K_1$ **6** समुदाय इति ] $A_1G_1S_1$ ; समुदायो हि नैकेन विना धर्मेण जायते $K_1$ **7** °दिषु समुदाया दृष्टाः ] $A_1G_1$ ; ++++++++ $K_1$ ; °दिसमुदायादिषु $S_1$ **9** संभवतीत्य° ] $A_1G_1S_1$ ; संभवति अ° $K_1$ **9** नापीति ] $A_1G_1S_1$ ; नाप्येकदेशता तेषामस्ति नाप्येककालता $K_1$ **11** भिन्नो ] $K_1S_1$ ; भिद्यन्नो $A_1G_1$ **11** °भिन्नो वा ] $A_1G_1K_1$ ; °भिन्नो वा स्यान् $S_1$ **12** व्यतिरिक्त इति ] $A_1G_1S_1$ ; व्यतिरिक्तश्च संघातस्तेषां कश्चिन्न बिद्यते $K_1$ **14** °रेके तु समुदायिनामेव ] $A_1G_1S_1$ ; +++++++++ $K_1$ **14** तेषां चानन्त्यात् ] $A_1G_1S_1$ ; तेषामानन्त्याच्च $K_1$ **15** यदीति ] $A_1G_1S_1$ ; यदि त्वव्यतिरेक स्यादानन्त्यन्तदवस्थितम् $K_1$

यदि तूच्यते—न प्रत्येकं न वा समुदायरूपेणापोह्यमभिधीयते। किं तु सर्वेषां सामान्यमगौरिति रूपम्। तेनापोहो भविष्यतीति।

तदयुक्तम्। न हि सामान्यं नाम वस्तुरूपमभ्युपेयते भवद्भिर्येन बहूनामपोहो भवेत्। अगोरूपं त्ववस्तुभूतम्, न तदपोहनक्रियाकर्मभावेनावगन्तुं शक्यमिति वक्ष्यमाणाभिप्रायेणाशङ्क्या सहाह—यदीति।

64a

अभिप्रायं विवृणोति—कथमिति।

64b

अवस्त्वनपोहे कारणमाह—नाभाव इति। भावान्तरप्रतिषेधो ह्यभावः, न तुच्छ एवाभावो ऽभावं प्राप्नोतीति।

64cd

तदपोहाभ्युपगमे च तस्यापि भावधर्मकत्वाद् भावत्वापत्तिरित्याह—अपोह्यमान इति। एवं च यद्यभावात्मकागोरूपापोहेन गौः

---

**1 न वा** ] $A_1G_1S_1$; **न च** $K_1$ **1 °पोह्यम°** ] em.; **°पोहो** $A_1G_1K_1$; **°पोहम°** $S_1$ **2 किं तु** ] $A_1G_1K_1$; **यत्तु** $S_1$ **2 °मगौरिति** ] $K_1S_1$; **°मगोरिति** $A_1G_1$ **2 भविष्यतीति** ] $A_1G_1$; **भविष्यति** $K_1S_1$ **3 नाम** ] $A_1G_1K_1$; **नाम किंचिद्** $S_1$ **3 °मभ्युपेयते** ] $A_1G_1S_1$; **°मुपेयते** $K_1$ **4 भवद्भिर्येन बहूनामपो°** ] $A_1G_1S_1$; +++++++++ $K_1$ **4 °वस्तुभूतम्** ] $A_1G_1S_1$; **°वस्तुरूपन्** $K_1$ **5 °भावेनावगन्तुं** ] $K_1$; **°भावे -- न्तुं** $A_1G_1$; **°भावेनावसातुं** $S_1$ **6 यदीति** ] $A_1G_1S_1$; **यदि सामान्यरूपेण ते पोह्यन्ते न वस्तुता** $K_1$ **8 कथमिति** ] $A_1G_1S_1$; **कथं वावस्त्वपोह्येत** $K_1$ **10 नाभाव इति** ] $S_1$; **नापोह इति—भाव इति** $A_1G_1$; **नाभावो भावमृच्छन्ति** $K_1$(unmetrical) **10 भावान्तरप्रतिषेधो** ] $S_1$; **भावान्तरप्रतिषेध एव** $A_1G_1$; ++++++++ $K_1$ **11 न** ] $A_1G_1K_1$; **न तु** $S_1$ **13 °हाभ्युपगमे** ] $K_1$; **°ह्यभ्युपगमे** $A_1G_1$; **°हापगमे** $S_1$ **13 भावधर्मक°** ] $S_1$; **भावधर्मात्मक°** $A_1G_1$; **भावधर्म°** $K_1$ **13 °त्वाद्** ] $S_1$; **°त्वाद् घटादिवद्** $A_1G_1K_1$ **14 अपोह्यमान इति** ] $A_1G_1S_1$; **अपोह्यमाने चाभावे भाव एवावशिष्यते** $K_1$ **14 च** ] $K_1S_1$; **वा** $A_1G_1$

प्रतीयते, एवं सत्यभावाद् भावाभ्युपगमे भावात्मकमेव गोसामान्यमापद्यत इति।

65ab

अत्रैव दूषणान्तरमाह—अपोह्येति। अस्यार्थः। अगौर्न भवतीत्यभावापोहे गवाश्वापोहयोः स्वरूपभेदाभावादपोह्यभेदो दुर्भणः। एवं चापोह्यभेदकारितो ऽपोहभेद इति यदुक्तं तद्व्याहतमित्यभिप्राय इति।

65cd

यदि तु भिन्नापोहविषयत्वादपोह्यानां भेदो ऽभ्युपेयेत, ततो दुरुत्तरमितरेतराश्रयमित्याशङ्कया सहाह—तद्भेद इति।

66

इतरेतराश्रयमेव प्रपञ्चयति—गोसामान्यस्येति। सिद्धे ह्यपोहात्मनो गोसामान्यस्याश्वाद् भेदे भिन्नापोहविषयतया “अगौः” इत्येष गोरपोह्यो ऽश्वापोह्याद् भिद्यते। अपोहरूपं च गोसामान्यम् “अगौः”

---

**1** प्रतीयते ] $A_1G_1$; प्रतीयेत $K_1S_1$ **1** सत्यभावाद् ] $S_1$; सत्य॰ $A_1G_1$; सत्यभावा+ $K_1$ **1** भावाभ्युपगमे भावात्मकमेव ] $A_1G_1$; +++++++++ $K_1$; भावाभ्युपगमे भावात्मकत्वमेव $S_1$ **4** अपोह्येति ] $A_1G_1S_1$; अपोह्यभेदक्लृप्तिश्च नाभावाभेदतो भवेत् $K_1$ **4** भवतीत्य॰ ] $S_1$; भवतीत्येवम॰ $A_1G_1K_1$ **5** ॰श्वापोहयोः ] $A_1G_1$; ॰श्वापोह्ययोः $K_1$; ॰श्वाभावयोः $S_1$ **6** ऽपोहभेद इति यदुक्तं ] $S_1$; भावापोहभेद इति यदुक्तं $A_1G_1$; पो+++++++++ $K_1$ **6** ॰द्व्याहतमित्य॰ ] $A_1G_1K_1$; ॰द्व्याहन्येतेत्य॰ $S_1$ **8** ॰दपोह्यानां ⋯ गोसामान्यस्येति ] $A_1G_1S_1$; ॰दगोरित्येष भिद्यते अगौरित्यस्याभेदेन गोसामान्यञ्च भिद्यते $K_1^{ac}$; ॰देवापोह्यानाम् भेदो भ्युपेयते ततो दुरुत्तरमितरेतराश्रयम् इत्याशंकया सहाह तद्भेद इति इतरेतराश्रयमेव प्रपञ्चयति गोसामान्यस्य भिन्नत्वादगोरित्येष भिद्यते अगौरित्यस्याभेदेन गोसामान्यञ्च भिद्यते $K_1^{pc}$ **8** ऽभ्युपेयेत ] $A_1G_1S_1$; भ्युपेयते $K_1^{pc}$ **11** गोसामान्यस्येति ] $A_1G_1S_1$; गोसामान्यस्य भिन्नत्वादगोरित्येष भिद्यते अगौरित्यस्याभेदेन गोसामान्यञ्च भिद्यते $K_1^{pc}$ **12** ॰विषयतया ] $K_1S_1$; ॰विषयत्वाद् $A_1G_1$ **13** गोरपोह्यो ] $S_1$; गौरपोह्यो $A_1G_1$; गौ॰+++ $K_1$ **13** ऽश्वापोह्याद् ] $A_1G_1S_1$; ++ह्याद् $K_1$ **13** भिद्यते ] $A_1G_1K_1$; भिद्येत $S_1$ **13** गोसामान्यम् ] $A_1G_1K_1$; सामान्यम् $S_1$ **13** अगौः ] $A_1G_1K_1$; अगोर् $S_1$

इत्यस्यापोह्यस्य भेदेन भिन्नं न स्वत इतीतरेतराश्रयमिति।

67abc

नन्वगौर्नाम न गोरभावमात्रम्। अश्वादयो ह्यगावः। ते च स्वतो भिन्ना इति नेतरेताश्रयम्।

मैवम्, अश्वादीनामप्यभावात्मनां स्वतो भेदासंभवात्। ते ऽपि कर्कादिस्वविशेषापेक्षया सामान्यात्मानः। सामान्यं चापोहरूपमिति वः सिद्धान्तः। अतश्चाभावात्मकत्वान्न स्वतो भेदस्तेषामित्यभिप्राये-णाशङ्कया सहाह— अगाव इत्यपेक्षयान्तेन।

67cd

अथैकत्वे सत्यपि कर्कादिस्वविशेषापेक्षयाश्वादीनां भेदो भविष्यति, न गोसामान्यभेदादिति कथमितरेतराश्रयम्। अत आह—ते ऽपी-ति। कर्कादयो ऽप्यनेन प्रकारेण स्वविशेषापेक्षया तथैवाश्वादिवत्सा-मान्यात्मानस् ततश्चाभावात्मकत्वान्नाश्वादीन् भेत्तुमलमिति भावः।

67d–68a

---

**1 भेदेन** ] $A_1G_1S_1$ ; भेदात् $K_1$ **1 भिन्नं** ] $A_1G_1S_1$ ; भिद्यते $K_1$ **1 इतीतरेतरा-श्रयमिति** ] $A_1G_1$ ; इतीतरेतराश्रयत्वमिति $K_1$ ; इतरेतराश्रय इति $S_1$ **3 न** ] $A_1G_1S_1$ ; om. $K_1$ **4 भिन्ना इति** ] $S_1$ ; भिन्ना एवेति $A_1G_1K_1$ **4 °श्रय-म्** ] $A_1G_1K_1$ ; °श्रयः $S_1$ **5 °प्यभावात्मनां स्व°** ] $A_1G_1S_1$ ; ++++++ $K_1$ **5 ऽपि** ] $K_1$ ; पि हि $A_1G_1S_1$ **6 कर्कादिस्व°** ] $K_1$ ; कर्तादिस्व° $A_1G_1$ ; का-र्यादि° $S_1$ **6 °पेक्षया** ] $A_1G_1K_1$ ; °पेक्षस्य $S_1$ **6 सामान्यं** ] $K_1S_1$ ; साम्यं $A_1G_1$ **6 °रूप°** ] $A_1G_1K_1^{pc}S_1$ ; om. $K_1^{ac}$ **7 अतश्चा°** ] $A_1G_1K_1$ ; ततश्चा° $S_1$ **8 अगाव इत्यपेक्षयान्तेन** ] $A_1G_1$ ; अगावो श्वादयश्चेत् स्युस्ते प्यभावात्मकाः पुनः कर्का++++ $K_1$ ; अगाव इत्यपेक्षयेत्यन्तेन $S_1$ **10 अथैकत्वे सत्यपि** ] $A_1G_1$ ; +++त्वे सत्यपि $K_1$ ; नन्वेवमपि $S_1$ **12 ते ऽपीति** ] $A_1G_1S_1$ ; ते पि तथेति $K_1$ **12 कर्कादयो ऽप्यनेन** ] em. ; ते पि कर्कादयो ह्यनेन $A_1G_1$ ; कर्कादय इत्यनेन $K_1$ ; कर्कादय इत्यनेनैव $S_1$ **12 स्वविशेषा°** ] $A_1G_1K_1$ ; विशेषा° $S_1$ **13 °त्मानस्** ] $A_1G_1K_1$ ; °त्मनस् $S_1$ **13 ततश्चा°** ] $K_1S_1$ ; तश्चा° $A_1G_1$ **13 °भावात्मकत्वान्नाश्वादीन्** ] $A_1G_1S_1$ ; ++++++दिवत् $K_1$ **13 °मिति भावः** ] $K_1S_1$ ; °मित्यर्थः $A_1G_1$

किं चास्तु तावदपोह्यभेदाद् भेदः। अपोह्यमेव किमिति दुर्निरूपमित्याह—एवमिति। अपोह्याभिमतेष्वश्वादिष्वेष एव प्रसङ्ग आ परमाणुभ्य आपद्यत इति नापोह्यं नाम किमपि निरूपयितुं शक्यमिति भावः।

68a

न केवलमपोह्यं दुर्निरूपम्, क्वापोह इत्यपि निरूपयितुमशक्यमेवेत्याह—क्व चेति।

68b

अत्र कारणमाह—गोपिण्डेष्विति। अपोह्यवदपोहाधारेष्वपि गोपिण्डेष्वन्त्यावयवं यावत् सामान्यप्रसञ्जनं कृत्वाभावात्मकत्वं दर्शयितव्यमिति भावः।

68cd

तत्रैतस्मिन् प्रसङ्गे द्वयमप्येतदपोहकर्माधारात्मकमन्त्येष्वेव परमाणुष्वापद्येत, तेषामसाधारणात्मकत्वेन स्वरूपभेदस्थितेरित्यभिप्रायेणाह—तत्रेति।

69ab

अस्तु तर्हि परमाणुष्वेवापोह्यापोहाधारव्यवहारः। अत आह—न

---

**1** **किं चास्तु** ] $A_1G_1$; **एवं चास्तु** $K_1S_1$ **1** **°पोह्यभेदाद् भेदः** ] $A_1G_1K_1$; **°पोह्यभेदः** $S_1$ **1** **अपोह्यमेव** ] $A_1G_1K_1$; **अपोह्यमेव तु** $S_1$ **2** **एवमिति** ] $A_1G_1$; **एवन्न गम्यते किमपोह्यम्** $K_1$; **किमपोह्यमिति** $S_1$ **2** **°दिष्वेष एव** ] $A_1G_1S_1$; **°दिषु** $K_1$ **3** **आपद्यत** ] $A_1G_1K_1$; **आपद्यंत** $S_1$ **6** **°वलमपोह्यं दुर्निरू°** ] $A_1G_1S_1$; ++++++++ $K_1$ **6** **क्वापोह** ] $K_1S_1$; **क्व चापोह** $A_1G_1$ **7** **क्व चेति** ] $S_1$; **क्व वेति** $A_1G_1$; **क्व चापोहः** $K_1$ **9** **गोपिण्डेष्वेवमेव च** $K_1$ **9** **अपोह्यवदपोहा°** ] $A_1G_1S_1$; **अपोह्यवदेवापोह्या°** $K_1$ **10** **°ष्वन्त्यावयवं** ] $A_1G_1$; **°ष्वन्त्यावयवास्यावत्** $K_1$; **°ष्वन्यावयवानुदयाद्** $S_1$ **10** **°त्मकत्वं** ] $A_1G_1K_1$; **°त्मकं** $S_1$ **13** **तत्रैतस्मिन् प्रसङ्गे द्व°** ] $A_1G_1$; ++++++++ $K_1$; **अत्रैतत्प्रसंगे द्व°** $S_1$ **14** **°ष्वापद्येत** ] $A_1G_1$; **°षूपपद्येत** $K_1$; **°ष्वापद्यते** $S_1$ **15** **तत्रेति** ] $A_1G_1S_1$; **तत्र स्याद्द्वयमप्येतदन्त्येषु परमाणुषु** $K_1$ **17** **परमाणु°** ] $A_1G_1S_1$; **परमणु°** $K_1$ **17** **°षेवापोह्या°** ] $A_1G_1K_1^{pc}S_1$; **°ष्वेवापद्येतापोह्या°** $K_1^{ac}$

चेति। यो ऽयमभिधाशब्दं प्रति व्यवहारः, नायमन्त्यावयवाश्रितः संभवति, संबन्धसंवेदनाधीनत्वाच्छब्दव्यवहाराणाम् अन्त्यैश्चातीन्द्रियैस्तदसंभवादिति भावः।

69cd–70

इतश्च परमाण्वाश्रयो नापोह्यादिव्यवहार इत्याह—गवाश्वेति सार्धेन। बौद्धा हि न तावद् वैशेषिकादिवद् द्रव्यरूपान्नानागुणकान् परमाणून् संगिरन्ते, येनैषां गुणभेदकारितो विशेषो भवेत्, रूपादिसंघातमात्रत्वाद् अणूनाम्। रूपादिसंघातश्च न गवाश्वयोर्विशिष्यत इति नापोह्यापोहाधारभेदो ऽवसातुं शक्यत इति। अस्माकमपि पार्थिवाद्याः परमाणवो गवाश्वयोरविशिष्टाः। द्वयोरपि हि चातुर्भौतिकः संघातः।

न च भूताणूनां स्वरूपभेद उभयत्रापि कश्चिदस्ति, पार्थिवाद्यानां परमाणूनां द्वयोरपि रूपादीनामविशेषात्। जातिरपि पृथिवीत्वादिका द्वयोरप्यविशिष्टा। संस्थानकारितस्तु विशेषस्तदभावादणूनां न

**1 न चेति** ] $A_1G_1S_1$; न चान्त्येषु द्वयोरस्ति व्यवहारो भिधां प्रति $K_1$ **1 °भिधा°** ] $A_1G_1$; °भि+ $K_1$; °भिधांश° $S_1$ **1 °शब्दं प्रति व्यवहारः** ] $A_1G_1S_1$; ++++++++ $K_1$ **1 नायमन्त्यावयवाश्रितः** ] $G_1$; नायमत्यन्तावयवाश्रितः $A_1$; +यमन्त्याश्रस् $K_1$; नायमन्याश्रयः $S_1$ **2 °संवेदनाधीन°** ] $A_1G_1$; °वेदनाधीन° $K_1$; °संवेदनाधार° $S_1$ **6 गवाश्वेति सार्धेन** ] $A_1G_1S_1$; गवाश्वपरमाणूनां विशेषश्च न विद्यते स्वरूपजातिसंस्थानपरिमाणादिलक्षणः के +++++++ $K_1$ **6 °न्नाना°** ] $A_1G_1S_1$; °न्नान° $K_1$ **7 विशेषो** ] $A_1G_1$; भेदो $K_1S_1$ **8 °संघातमात्रत्वाद्** ] $A_1G_1$; °मात्रसंघातत्वाद् $K_1$; °मात्रात्मत्वाद् $S_1$ **9 न गवाश्वयोर्विशिष्यत** ] $A_1G_1$; गवाश्वयोर्न विशेष्यत $K_1$; न गवाश्वयोर्विशेषित $S_1$ **9 इति नापोह्यापो°** ] $A_1G_1S_1$; ++++++ $K_1$ **9 °हाधारभेदो** ] $A_1G_1K_1S_1^{pc}$; °हभेदो $S_1^{ac}$ **9 शक्यत इति** ] $A_1G_1K_1$; शक्यते $S_1$ **10 °विशिष्टाः** ] $A_1G_1$; °विशिष्टा एव $K_1S_1$ **10 हि** ] $A_1G_1K_1$; om. $S_1$ **11 चातुर्भौतिकः** ] $A_1G_1K_1$; चान्तर्भौतिकः $S_1$ **12 पार्थिवाद्यानां** ] $A_1G_1$; पार्थिवादीनां $K_1$; पार्थिवानां $S_1$ **13 °पि रूपादीनामविशे°** ] $A_1G_1S_1$; +++++++ $K_1$ **14 °दिका द्वयोरप्य°** ] $A_1G_1K_1$; °दिकोभयत्रा° $S_1$ **14 विशेषस्त°** ] $A_1G_1K_1$; विशेषितस्त° $S_1$ **14 °दणूनां** ] $A_1G_1K_1$; °देव परमाणूनां $S_1$

संभवति। न च स्थूलानामिव परिमाणिको विशेषः परमाणूनां संभवति। तत्र न विद्मः के ऽपोह्याः कुत्र वापोह इति। एवं चासति विशेषावसाये ऽनाश्रयो ऽपोहव्यवहारो न संवर्तत इति।

71

अपि चैवमपोहवादी वक्तव्यः। कस्यात्रागोपोहविषयात्मना ग्रहणम्। कुत्रायमगोपोहो ऽवसातव्य इति यावत्। न तावदेक एव कश्चिदपोहविषयः पिण्डः, व्यभिचारात्। नानासन्तश्च नासति सारूप्ये ऽपोहविषयात्मना शक्यन्ते गृहीतुम्, आनन्त्यादेव। एकेनोपलक्षणेनानन्तानामपि सुग्रहः संबन्धो भवेत्। तदभावे केनाकारेणापोहविषयमुपलक्षयामः। तत्राप्रसिद्धे संबन्धे न कश्चिच्छब्दो ऽपोहविषयो ऽवगम्यते, अगृहीतसंबन्धस्यावाचकत्वादित्यभिप्रायेणाह—न चेति। अविशेषत इत्येकस्मिन्नसत्युपलक्षणे गवाश्वयोरविशेष इत्यर्थः।

72abc

अयमेव चापोह्येष्वपि प्रसङ्गो दर्शयितव्य इत्याह— अपोह्यान् इति

---

**1** परिमाणिको ] $K_1$; परिणामिको $A_1S_1^{ac}$; पारिणामिको $G_1S_1^{pc}$ **2** संभवति ] $A_1G_1K_1$; विशेषः संभवति $S_1$ **2** के ] $S_1$; को $A_1G_1K_1$ **2** वापोह ] $A_1G_1K_1$; वापोह्या $S_1$ **3** षावसाये ऽनाश्रयो ऽपो° ] $A_1G_1S_1$; ++++++++ $K_1$ **5** °त्रागो° ] $A_1G_1K_1$; °त्रो° $S_1$ **7** °रात्। नानासन्तश्च नासति ] $A_1G_1K_1$; °रादनन्ताश्चासति $S_1$ **7** सारूप्ये ] $A_1G_1K_1$; रूपे $S_1$ **8** °षयात्मना शक्यन्ते गृही° ] $A_1G_1S_1$; +++++++++ $K_1$ **8** आनन्त्या° ] $A_1G_1K_1$; आत्मानन्त्या° $S_1$ **8** एकेनो° ] $A_1G_1K_1$; एकेन ह्यु° $S_1$ **9** भवेत् ] $A_1G_1K_1$; भवति $S_1$ **9** °भावे ] $K_1$; °भावे तु $A_1G_1S_1$ **10** तत्राप्रसिद्धे ] $A_1G_1K_1$; अत्रागृहीते $S_1$ **10** कश्चिच्छब्दो ऽपो° ] $A_1G_1$; कश्चिदपो° $K_1S_1$ **11** °स्यावा° ] $A_1G_1K_1$; °स्य शब्दस्य वा° $S_1$ **12** °येणाह—न चेति ] $A_1G_1S_1$; ++++++++रूप्यानपोह्यविषयात्मना शक्तः कश्चिदपि ज्ञातुं गवादीनविशेषतः $K_1$ **12** अविशेषत ] $A_1G_1$; om. $K_1$; शेषत $S_1$ **12** इत्येकस्मिन्नसत्यु° ] $A_1G_1$; इति असत्येकस्मिन्नु° $K_1$; इत्येकस्मिन्नु° $S_1$ **12** °विशेष ] $A_1G_1S_1$; °विशेषत $K_1$ **14** अयमेव चा° ] $A_1G_1$; अयमेवा° $K_1$; अयमपि चा° $S_1$ **14** °पोह्येष्वपि ] $A_1G_1K_1$; °पोह्येष्वेव $S_1$

शक्तिरन्तेन।

72d

तत्र को दोषः। अत आह—तत्रेति। असत्यपोह्यापोहाधारविवेके ऽपोहो न सिध्येदित्यर्थः।

73abc

दूषणान्तरमाह—न चेति। शब्दलिङ्गावसेयो ऽपोह इति वः सिद्धान्तः। न चान्वयविनिर्मुक्ता शब्दलिङ्गयोः प्रवृत्तिः संभवति। न च ताभ्यां विनापोहः सिध्यति, तदेकप्रमाणत्वात्। अपोहसिद्ध्या च शब्दलिङ्गयोः प्रवृत्तिः सिध्यति, तत्प्रवृत्त्या चापोहसिद्धिरितीतरेतराश्रयमिति भावः।

73d

नन्वसाधारण एव गृहीतान्वयः शब्दो लिङ्गं वापोहं प्रत्याययिष्यति। अत आह—न चासाधारणे ऽन्वय इति। असाधारणो हि न

---

**1** अपोह्यान् इति शक्तिरन्तेन ] $A_1G_1$; अपोह्यानपि चाश्वादीनेकधर्मान्वयादृते न निरू+++++ $K_1$; अपोह्यान् इति $S_1$ **3** तत्र को ] $A_1G_1S_1$; +++ $K_1$ **3** तत्रेति ] $A_1G_1$; तत्र चापोहो न सिध्यति $K_1$(unmetrical); om. $S_1^{ac}$; नेति $S_1^{pc}$ **3** असत्य° ] $A_1G_1K_1$; सत्य° $S_1$ **3** °पोह्यापोहा° ] $A_1G_1K_1$; °पोह्या° $S_1$ **4** सिध्येदित्य° ] $A_1G_1K_1$; सिध्यतीत्य° $S_1$ **6** न चेति ] $A_1G_1$; न चान्वयविनिर्मुक्ता प्रवृत्तिर्लिंगशब्दयोः $K_1$; न च शब्देति $S_1$ **6** °लिङ्गावसेयो ऽपोह ] $G_1K_1$; °लिङ्गावसायो ऽपोह $A_1$; °लिंगबाह्यपोह्यापोह $S_1$ **7** चान्वयविनिर्मुक्ता शब्द° ] $A_1G_1$; ++++++++++ $K_1$; चापोहान्वयनिर्मुक्ता शब्द° $S_1$ **7** °योः प्रवृत्तिः ] $S_1$; °योर्वृत्तिः $A_1G_1$; °यो प्रवृत्तिः $K_1$ **8** ताभ्यां विना° ] $K_1S_1$; ताभ्यामपि ना $A_1G_1$ **8** °प्रमाण° ] $K_1S_1$; °प्रमाणक° $A_1G_1$ **8** °त्वात्। अपो° ] $A_1G_1K_1$; °त्वादतो पो° $S_1$ **8** °सिद्ध्या ] $K_1S_1$; °सिद्ध्या च $A_1G_1$ **9** प्रवृत्तिः ] $A_1G_1K_1$; प्रवृत्तिः संबन्धग्रहणपूर्विका $S_1$ **9** सिध्यति ] $A_1G_1S_1$; संभवति $K_1$ **9** तत्प्रवृत्त्या चा° ] $K_1S_1$; तत्प्रवृत्त्या° $A_1G_1$ **12** °रण एव ] $A_1G_1S_1$; °रणेन $K_1$ **13** प्रत्याययिष्यति। अत आह ] $A_1G_1S_1$; ++++++++++ $K_1$ **13** न चासाधारणे ऽन्वय इति ] $A_1G_1$; न चासाधारणे न्वयः $K_1$; न चासाधार इति $S_1$ **13** हि न ] $A_1G_1K_1$; हि $S_1$

व्यभिचारादन्वयभाजनमिति।

74ab

अपोहस्तु शब्दलिङ्गप्रवृत्तेः प्रागनिष्पन्न एवेति न तत्साहचर्यं शब्दलिङ्गयोः शक्यमवसातुमित्याह—अपोह इति।

74cd

न चासत्यन्वयदर्शने शब्दलिङ्गयोः प्रमाणता संभवतीत्याह—तस्मिन्निति।

75ab

स्यादेतत्। अन्यव्यावृत्तिमुखेन शब्दलिङ्गाभ्यां स्वार्थः प्रत्याय्यते। किमत्रान्वयदर्शनेन। अगोरूपेभ्यो ऽश्वादिभ्यो ऽवृत्तिदर्शनेन व्यावृत्तो गोशब्दो गां गमयिष्यति, लिङ्गं च विपक्षाद्व्यावृत्तं साध्यार्थमिति न किंचिदनुपपन्नमित्यत आह—न चेति।

75cd

कारणमाह—सर्वत्रेति। यथा खल्वश्वादिषु गोशब्दो न दृष्ट इति तान्न

---

**1** °चारादन्वय° ] $A_1G_1K_1$; °चारान्नान्वय° $S_1$ **3** प्राग° ] $A_1G_1K_1$; प्राग् $S_1$ **3** निष्पन्न एवेति ] $A_1G_1S_1$; निष्पन्नं वेति $K_1^{ac}$; निष्पन्नं एवेति $K_1^{pc}$ **4** अपोह इति ] $A_1G_1S_1$; अपोहश्चाप्यनिष्पन्नः साहचर्यं क्व दृश्यताम् $K_1$ **6** न चा° ] $A_1G_1K_1^{pc}$; न वा° $K_1^{ac}$; स चा° $S_1$ **6** °सत्य° ] $K_1$; °सत्येवा° $A_1G_1S_1$ **6** शब्दलिङ्गयोः ] $A_1G_1$; शब्दलि++ $K_1$; लिंगशब्दयोः $S_1$ **6** प्रमाणता संभवती° ] $A_1G_1$; ++++++++ $K_1$; प्रमाणं संभवती° $S_1$ **7** तस्मिन्निति ] $A_1G_1S_1$; तस्मिन्नदृश्यमाने च न तयो स्यात् प्रमाणता $K_1$ **9** °व्यावृत्तिमुखेन ] $A_1G_1S_1$; °निवृत्तिमुखेनैव $K_1$ **9** शब्दलिङ्गाभ्यां ] $A_1G_1S_1$; लिंगशब्दाभ्यां $K_1$ **10** अगोरूपेभ्यो ] $A_1G_1K_1$; अपोहरूपेभ्यो $S_1$ **10** ऽश्वादिभ्यो ऽवृत्तिदर्शनेन ] $A_1G_1$; दर्शनेन $K_1$; श्वादिभ्यो दर्शनेन $S_1$ **11** विपक्षाद्व्या° ] $A_1G_1$; विषयव्या° $K_1S_1$ **11** साध्यार्थमिति ] $A_1G_1K_1$; साध्यमिति $S_1$ **12** न किंचिदनुप° ] $A_1G_1K_1$; न नोप° $S_1$ **12** °मित्यत आह ] $A_1G_1S_1$; °मिति आनत्तृह $K_1$ **12** न चेति ] $A_1G_1S_1$; न चादर्शनमात्रेण ताभ्याम् प्रत्यायनं भवेत् $K_1$ **14** सर्वत्रेति ] $A_1G_1S_1$; सर्वत्रैव ह्यदृष्टत्वात् प्रत्याय्यं नावशिष्यते $K_1$ **14** न दृष्ट इति तान्न ] $A_1G_1K_1$; दृष्ट इति तान् $S_1$

प्रत्याययति, एवं गव्यप्यदृष्टपूर्वो न गां गमयेत्। एवं लिङ्गे ऽपि प्रसङ्गो दर्शयितव्य इति।

76

इदानीं यत्तदुक्तम् “न चाप्रसिद्धसारूप्यान्” इति, तत्रैव व्यतिरेके दोषमाह—अथेति। एवं हि प्रागुक्तम्। नाप्रसिद्धसारूप्याः शाबलेयादयो ऽपोहविषयतयावसातुं शक्यन्त इति। नापोहः सिध्यतीति। यदि त्वसत्येव सारूप्ये ऽपोहकल्पना स्यात्, एवं सत्यविशेषेण गवाशवयोरगोपोहप्रसञ्जनं न निवारयितुं शक्यते। तत्रागोपोहवत्त्वादश्वो ऽपि गौः प्रसज्येत। सारूप्यं तु नासत्येकसामान्यान्वये संभवतीति भावः।

77ab

यदुक्तम् “शाबलेयादिरूपोपलक्षिता विशेषा अगोपोहस्यालम्बनं भविष्यतीति नातिप्रसङ्गः” इति। तन्न। एवं सति गव्यपि बाहुलेयोपसर्गाद् बाहुलेयो ऽपि न शाबलेयरूपोपलक्षित इति कथमगोपोहविषयो भवेत्। तस्य वा तद्विषयत्वे ऽश्वेति प्रसङ्गो दुर्वारः,

---

**4** *Ślokavārttika apoha* 71a

---

**1** °ति, एवं गव्यप्य° ] $A_1G_1K_1$; °तीत्येवं शब्दस्य $S_1$ **2** दर्शयितव्य इति ] $K_1S_1$; दर्शयितव्यः $A_1G_1$ **4** यत्तदुक्तम् ] $A_1G_1S_1$; यदुक्तन् $K_1$ **5** अथेति ] $A_1G_1S_1$; अथासत्यपि सारूप्ये स्यादपोहस्य कल्पना गवाश्वयोरयं कस्मादगोपोहो न कल्प्यते $K_1$ **6** शाबलेयादयो ] $A_1G_1S_1$; शाबलेयादोयो $K_1$ **6** °यतया° ] $A_1G_1S_1$; °यता° $K_1$ **8** °योरगोपोह° ] $A_1G_1K_1$; °योरप्यपोह° $S_1$ **8** न ] $A_1G_1K_1$; om. $S_1$ **9** °वत्त्वाद° ] $A_1G_1K_1$; °वलाद° $S_1$ **10** °तीति भावः ] $A_1G_1K_1$; °तीत्यर्थः $S_1$ **12** यदुक्तम् ] $A_1G_1$; यदि मतं $K_1S_1$ **12** शाबलेयादि° ] $A_1G_1K_1$; शाबलेय° $S_1$ **12** °लक्षिता ] $A_1G_1S_1$; °लक्षिता हिव $K_1$ **12** अगोपोहस्या° ] $A_1G_1K_1$; अपोहस्या° $S_1$ **13** भविष्यतीति ] $A_1G_1K_1$; भविष्यन्तीति $S_1$ **13** नातिप्र° ] $A_1G_1K_1$; नात्र प्र° $S_1$ **13** गव्यपि ] $A_1G_1K_1$; शब्दे पि $S_1$ **14** बाहुलेयोपसर्गाद् बाहुलेयो ऽपि ] $A_1$; बाहुलेयो $G_1S_1$(eyeskip); बाहुलेये पसर्गात् बाहुलेयो हि $K_1$ **15** ऽश्वेति ] $A_1G_1$; श्वे पि $K_1S_1$

उभयोरपि शाबलेयरूपभेदाविशेषादित्याह—शाबलेयाच्चेति। तदवश्यं सकलशाबलेयबाहुलेयाद्यनुगतमश्वादिभ्यो व्यावृत्तं किमपि सामान्यमेषितव्यं यत्रागोपोहेन वर्तितव्यम्। इतरथा न व्यवस्थितोऽगोपोहविषयः शक्यो ऽवगन्तुम्।

77cd

तदभ्युपगमे च वृथैवाप्रतीयमानापोहकल्पनेत्यभिप्रायेणाह—सामान्यमिति।

78ab

अपि चायं शब्दं प्रयुयुङ्क्षमाणः प्रथमतरमवधारयति तावत् “इहायं शब्दः प्रयोक्तव्यः” इति। तदयमगोपोहवादी प्रमाणान्तरानवधृतविषयः क्व शब्दं प्रयुञ्जीत। न ह्यस्येन्द्रियाणामगोपोहो विषयः, यत् तैरगोपोहं बुध्वा “पश्य गाम्” इत्यादिशब्दं प्रयुञ्जीत। तदेतदाह—इन्द्रियैरिति।

78cd

स्यादेतत्। अस्तीन्द्रियाणामसाधारणो विषयः। तमिन्द्रियैर्गृहीत्वा

---

**1** शाबलेयरूप° ] $A_1G_1$; शाबलेय° $K_1S_1$ **1** शाबलेयाच्चेति ] $A_1G_1$; शाबलेयाच्च भिन्नत्वन् बाहुलेश्वयोः समम् $K_1$(unmetrical); शाबलेयादिति $S_1$ **2** °शाबलेयबाहुलेया° ] $A_1G_1K_1$; °शाबलेया° $S_1$ **2** व्यावृत्तं किमपि सामान्यमे° ] $A_1G_1$; व्यावृत्तमपरं किमप्ये° $K_1$; व्यावृत्तमपरं किमपि रूपं सामान्यमे° $S_1$ **3** °पोहेन ] $A_1G_1S_1$; °पोहेन च $K_1$ **3** इतरथा ] $K_1$; इतरथा तु $A_1G_1S_1$ **4** ऽगोपोह° ] $A_1G_1S_1$; गोह° $K_1^{ac}$; पोह° $K_1^{pc}$ **4** ऽवगन्तुम् ] $A_1G_1K_1$; वसातुं $S_1$ **6** च ] $A_1G_1K_1$; om. $S_1$ **7** सामान्यमिति ] $A_1G_1S_1$; सामान्यन्नान्यदिष्टञ्चेत् क्वागोपोह प्रवर्तताम् $K_1$ **9** प्रयुयुङ्क्षमाणः ] $A_1G_1K_1$; प्रयुज्यमानः $S_1$ **9** प्रथमतरम° ] $A_1G_1K_1$; प्रथमम° $S_1$ **10** तदयमगोपोह° ] $A_1G_1$; तदयमपोह° $K_1$; तदपोह° $S_1$ **11** विषयः, यत् ] $A_1G_1K_1$; विषयो यं $S_1$ **12** तैरगोपोहं ] $A_1G_1$; तैरपोहं $K_1S_1$ **12** °गाम्” इत्यादि° ] $A_1G_1S_1$; °गामित्यमित्यादि° $K_1$ **12** तदेत° ] $A_1G_1K_1$; त° $S_1$ **13** इन्द्रियैरिति ] $A_1G_1S_1$; इन्द्रियैर्नाप्यगोपोह प्रथमम् व्यवसीयते $K_1$ **15** °धारणो ] $K_1S_1$; °धारणे $A_1G_1$

गवादयः शब्दाः प्रयोक्ष्यन्त इति। अत आह—नान्यत्रेति। यो ऽसाविन्द्रियविषयो ऽसाधारणो ऽर्थः, न तत्र शब्दवृत्तिः संभवति, सामान्यविषयत्वाच्छब्दस्य। यत्र च सामान्यात्मन्यपोहे शब्दवृत्तिसंभवः, नासाविन्द्रियविषय इति निर्विषयशब्दप्रयोगानुपपत्तिरिति।

79ab

न च वाच्यम्—मा भूदिन्द्रियविषयो ऽपोहः, अनुमानेन तं विदित्वा तत्र शब्दं प्रयोक्ष्यामह इति। पूर्वेण युक्तिप्रबन्धेनानुमानस्याप्यपोहप्रत्यायनाशक्तेर् अगृहीतसंबन्धस्य लिङ्गस्य तत्र वर्तितुमसामर्थ्यादित्यभिप्रायेणाह—पूर्वोक्तेनेति।

79cd

यथा शब्दप्रयोगकाले नेन्द्रियलिङ्गाभ्यामपोहावगतिः संभवति, एवं संबन्धानुभवो ऽपि शब्दस्यापोहेन प्रत्यक्षानुमानाभ्यां नोपपद्यत इत्याह—संबन्धेति। तेनेति येन कारणेनेन्द्रियलिङ्गयोर्नापोहं गमयितुं शक्तिरित्यर्थः।

80

**1 शब्दाः प्रयोक्ष्यन्त** ] $A_1G_1K_1$; प्रयुज्यंते $S_1$ **1 नान्यत्रेति** ] $A_1G_1S_1$; नान्यत्र शब्दवृत्तिश्च किं दृष्ट्वा स प्रयुज्यते $K_1$ **2 ऽसाविन्द्रिय॰** ] $A_1G_1K_1$; सावितींद्रिय॰ $S_1$ **2 शब्दवृत्तिः** ] $A_1G_1K_1$; शब्दप्रवृत्तिः $S_1$ **3 ॰त्मन्यपोहे** ] $A_1G_1K_1$; ॰त्मनापोह $S_1$ **4 ॰वृत्ति॰** ] $A_1G_1S_1$; ॰निवृत्ति॰ $K_1^{ac}$; ॰प्रवृत्ति॰ $K_1^{pc}$ **7 ऽपोहः** ] $K_1S_1$; ऽगोपोह $A_1$; गोहः $G_1^{ac}$; गोपोहः $G_1^{pc}$ **7 अनुमानेन तं** ] $A_1G_1$; अनुमानेन तु तं $K_1$; अनुमानेन तु तद् $S_1$ **8 प्रयोक्ष्यामह** ] $A_1G_1S_1$; प्रयोक्ष्याम $K_1$ **8 पूर्वेण** ] $A_1G_1$; पूर्वोक्तेन तु $K_1$; पूर्वोक्तेन $S_1$ **9 अगृहीतसंबन्धस्य** ] $A_1G_1K_1$; असंबन्धस्य $S_1$ **9 लिङ्गस्य** ] $K_1^{pc}S_1$; तल्लिङ्गस्य $A_1G_1$; om. $K_1^{ac}$ **9 वर्तितु॰** ] $A_1G_1K_1$; प्रवर्तितु॰ $S_1$ **10 पूर्वोक्तेनेति** ] $A_1G_1S_1$; पूर्वोक्तेन प्रबन्धेन नानुमाप्यत्र विद्यते $K_1$ **12 यथा** ] $S_1$; यथा च $A_1G_1K_1$ **13 संबन्धानुभवो** ] $K_1$; संबन्धानुभावो $A_1G_1$; सर्वथानुभवो $S_1$ **13 शब्दस्यापोहेन** ] $A_1G_1K_1$; शब्दस्यापोहेन च $S_1$ **14 संबन्धेति** ] $A_1G_1S_1$; संबन्धानुभवो प्यस्य तेन नैवोपपद्यते $K_1$ **14 ॰योर्नापोहं** ] $A_1G_1$; ॰योरपोहं $K_1S_1$

दूषणान्तरमाह—निवृत्तिरिति। अस्यार्थः। यद्यप्यपोहः शब्दार्थो भवेत्, एवं तर्हि येषां न प्रसिद्धो नञ्संबन्धः, तेषामगोरपोह्यस्यासिद्धत्वान्न गोशब्दादर्थप्रतिभासो भवेत्। प्रतियन्ति च ते ऽपि गोशब्दादुच्चरितादर्थम्। अतस्तेषामेषितव्यो वस्तुरूपगोशब्दार्थ इति।

81ab

अपि चायमगोपोहवादी वक्तव्यः—को ऽयमगौर् नाम यन्निवृत्त्या गौः प्रतीयत इति। वक्ष्यमाणदूषणाभिप्रायेण पृच्छति—अगोशब्देति।

81cd

इतर उत्तरं ददाति—न दृष्ट इति। संबन्धानुभवकाले यत्राश्वादौ गोशब्दो न दृष्टः, सो ऽगौः। अतो ऽगवापोहेन गौः प्रतीयत इति न किंचिदनुपपन्नमिति।

82abc

---

1 निवृत्तिरिति ] $A_1G_1$; निवृत्तिवाचिनः शब्दा न प्रसिद्धाश्च यान् प्रति तेषामगोरसिद्धत्वान्न सामान्यनिराक्रिया $K_1$; निवृत्तीति $S_1$ 1 यद्यप्यपोहः ] $A_1G_1S_1$; यद्यपोहः $K_1$ 2 एवं ] $A_1G_1K_1$; एव $S_1$ 2 येषां न प्रसिद्धो ] $A_1G_1K_1$; येषामप्रसिद्धो $S_1$ 2 नञ्संबन्धः ] $A_1G_1K_1$; नञर्थसंबन्धः $S_1$ 2 °मगोरपोह्य° ] $A_1G_1K_1$; °मगोपोह्य° $S_1$ 3 °सिद्धत्वान्न ] $A_1G_1K_1$; °प्रसिद्धत्वान्न $S_1$ 3 गोशब्दादर्थ° ] $A_1G_1$; गोशब्दार्थ° $K_1S_1$ 3 प्रतियन्ति च ] $G_1K_1$; प्रतियान्ति च $A_1$; प्रतीयन्ते $S_1$ 4 °दर्थम्। अत° ] $A_1G_1K_1$; °दनुक्तस् $S_1$ 4 °षितव्यो वस्तुरूपगोशब्दार्थ ] $A_1G_1$; °षितव्यो वस्तुरूप एव गोशब्दार्थ $K_1$; °षितव्यं वस्तुस्वरूपमेव सामान्यं गोशब्दार्थ $S_1$ 6 चायमगोपोह° ] $A_1G_1S_1$; चैवमपोह° $K_1$ 7 °भिप्रायेण ] $A_1G_1K_1$; °भिधित्सया $S_1$ 8 अगोशब्देति ] $A_1G_1$; अगोशब्दाभिधेयत्वं गम्यताञ्च कथं पुनः $K_1$; अगोशब्दे इति $S_1$ 10 इतर उत्तरं ] $A_1G_1S_1$; इत्युत्तरं $K_1^{ac}$; उत्तरं $K_1^{pc}$ 10 न दृष्ट इति ] $A_1G_1S_1$; न दृष्टो यत्र गोशब्दः संबन्धानुभवक्षणे $K_1$ 11 सो ऽगौः ] $A_1K_1S_1$; सो गोः $G_1$ 11 अतो ऽगवापोहेन गौः ] $A_1G_1K_1$; अतस्तदपोहेन गौ $S_1$

एतदिदानीं दूषयति—एकस्मादित्यपोह्यमन्तेन। एष खलु व्युत्पत्तिकाले क्वचिदेकत्रैव पिण्डे गृहीतसंबन्धः। अतो यदेव किंचित् ततः पिण्डादन्यत् तदेव बाहुलेयादीनामन्यतममपोह्यं भवेदिति।

82cd

एवं च गोसामान्यं गोशब्दवाच्यमिति न सिध्यतीत्याह—इतीति।

83

दूषणान्तरमाह—सिद्ध इति। अवश्यमनेनागोपोहरूपां गां प्रतिपाद्यमानेन पूर्वमगोरूपापोह्यस्य सिद्धिरेषितव्या, अकर्मकापोहप्रतीत्ययोगात्। अगौश्च गोनिषेधात्मेति तत्सिद्धये गौरेव प्रथममभ्युपेतव्यः। अयं नञा प्रतिषिध्यापोह्यः प्रत्येतव्यः। स चेद्वस्तुरूपः सिद्धः, किमपोहकल्पनयेति वक्ष्यमाणोऽभिप्राय इति।

84ab

तदेवं सत्यपि यद्यगोनिवृत्त्यात्मैवापोह्यग्रहणावसरे गौरिष्यते, एवं

---

**1** एतदिदानीं ] $A_1G_1S_1$; एतदपि $K_1$ **1** एकस्मादित्यपोह्यमन्तेन ] $A_1G_1S_1$; एकस्मात्तर्हि गोपिण्डाद् यदन्यत् सर्वमेव तत् भवेदपोह्यं $K_1$ **1** एष खलु ] $A_1G_1S_1$; काले क्वचिदेकत्रैव पिण्डे गृहीतसंबन्धः अतो यदेव किञ्चित् ततः पिण्डादन्यत् तदेव बाहुलेयादीना° $K_1^{ac}$; एष एव लु $K_1^{pc}$ **2** अतो यदेव ] $A_1G_1K_1$; अतो न्यदेव $S_1$ **2** किंचित् ततः ] $A_1G_1K_1$; किंचिदितः $S_1$ **3** °न्यतमम° ] $A_1G_1S_1$; °न्यतमद° $K_1$ **5** गोसामान्यं ] $A_1G_1K_1$; सामान्यं $S_1$ **5** °वाच्यमिति ] $A_1G_1K_1$; °वाच्यं $S_1$ **5** सिध्यती° ] $A_1G_1K_1$; भवती° $S_1$ **5** इतीति ] $A_1G_1S_1$; इत्येवन्न सामान्यस्य वाच्यता $K_1$ **7** सिद्ध इति ] $A_1G_1S_1$; सिद्धश्चागौरपोह्येत गोनिषेधात्मकश्च सः तत्रागौरेव वक्तव्यो नञा य प्रतिषिध्यते $K_1$ **7** °नागोपोहरूपां ] $A_1G_1$; °नापोहरूपं $K_1$; °नापोहरूप° $S_1$ **8** प्रतिपाद्यमानेन ] $A_1G_1K_1$; प्रतिपद्यमानेन $S_1$ **8** °मगोरूपापोह्यस्य ] $A_1G_1$; °मगोरूपस्या° $K_1S_1$ **10** °मभ्युपेतव्यः ] $A_1G_1S_1$; °मेषितव्यः $K_1$ **10** अयं नञा प्रतिषिध्यापोह्यः ] $A_1G_1$; यन्नञा प्रतिषिध्यापोह्यः $K_1$; नानुक्ता प्रषिध्यापोहः $S_1$ **10** प्रत्येतव्यः ] $A_1G_1S_1$; एषितव्यः $K_1$ **10** °रूपः ] $A_1G_1K_1$; °स्वरूपः $S_1$ **13** यद्यगोनिवृत्त्यात्मैवापोह्यग्रहणावसरे ] $A_1G_1S_1$; यद्यपोह्यग्रहणावसरे प्यगोनिवृत्त्यात्मैव $K_1$ **13** गौरिष्यते ] $A_1G_1S_1$; गौः प्रतीयते $K_1$

सतीतरेतराश्रयमापद्यत इत्याह—स चेदिति।

84cd

वस्तुरूपे तु गव्यपोह्यार्थमभ्युपगते वृथागोपोहकल्पनेत्याह—सिद्धश्चेदिति।

85ab

इतरेतराश्रयं विवृणोति—गवीति।

85cd

किंचेदमपि चात्र विकल्पनीयम्—किमाधारो ऽपोहः प्रत्येतव्य इति। यदि शाबलेयाद्याधारः, तन्न, तेषामपि सामान्यरूपत्वेनाभावात्मकत्वात्, अभावयोश्चावस्तुरूपत्वादाधाराधेयवृत्त्यादिसंबन्धानुपपत्तेरित्याह—नाधारेति।

86ab

असाधारणं तु वस्तुरूपं निर्विकल्पकत्वान्नापोहवत्तया शब्दादवगम्यत इत्याह—न चेति।

86cd

अपि चासाधारणस्य वस्त्वात्मनो ऽवस्त्वात्मनापोहेन संबन्धो ऽपि

---

**1** °मापद्यत इत्याह ] $A_1G_1$; °म् प्राप्नोतीत्याह $K_1$; °मापद्येतेत्याह $S_1$ **1** स चेदिति ] $A_1G_1S_1$; स चेदगोनिवृत्त्यात्मा भवेदन्योन्यसंश्रयः $K_1$ **3** वस्तुरूपे तु ] $A_1G_1K_1$; वस्तुस्वरूपे च $S_1$ **3** गव्यपोह्या° ] $G_1^{pc}K_1$; गव्यचोप्या° $A_1G_1^{ac}$; शब्दापोहा° $S_1^{ac}$; गव्यपोहा° $S_1^{pc}$ **3** वृथा° ] $G_1K_1S_1$; तथा° $A_1$ **3** °गोपोह° ] $A_1G_1K_1$; °पोह° $S_1$ **4** सिद्धश्चेदिति ] $A_1G_1S_1$; सिद्धश्चेत् गौरपोह्यार्थं व्यथापोहप्रकल्पना $K_1$ **6** गवीति ] $A_1G_1S_1$; गव्यसिद्धे प्यगौर्नास्ति तदभावे पि गौः कुतः $K_1$ **8** किंचेदमपि ] $K_1S_1$; किंचेदं $A_1G_1$ **8** विकल्पनीयम् ] $A_1G_1K_1$; निरूपणीयम् $S_1$ **9** तन्न ] $A_1G_1S_1$; न $K_1$ **9** °रूपत्वेना° ] $A_1G_1K_1$; °रूपत्वे ह्य° $S_1$ **11** °पपत्तेरि° ] $K_1S_1$; °पपत्तिरि° $A_1G_1$ **11** नाधारेति ] $A_1G_1S_1$; नाधाराधेयवृत्त्यादिसंबन्धश्चाप्यभावयोः $K_1$ **13** निर्विकल्पक° ] $S_1$; निर्विकल्पकत्वेनाभावात्मकत्वादभावयोश्चावस्तुरूपत्वादाधाराधेयवृत्यादिसंबन्धानुपपत्तिरित्याह — नाधारेति — असाधारणन्तु वस्तुरूपं निर्विकल्पक° $A_1G_1$; निर्विकल्प° $K_1$ **14** न चेति ] $A_1G_1S_1$; न चासाधारणं वस्तु गम्यते पोहवत्तया $K_1$

न संभवतीत्याह—कथं वेति।

87ab

किं चायमपोहवादी वक्तव्यः—अपोहमात्रं वा तद्विशिष्टो वा शब्दार्थ इति। तत्रापोहवाच्यत्वे दोषो वक्ष्यते। विशिष्टस्तु नासति संबन्धे प्रत्येतुं शक्यते। न चापोहतद्वतोरस्ति कश्चित्संबन्धप्रकार इत्युक्तम्। न चान्तरेणैव संबन्धं स्वरूपसत्तामात्रेणैव किंचित्कस्यचिद् विशेषणं संभवतीति न विशिष्टस्याभिधानं संभवतीत्यभिप्रायेणाह—स्वरूपेति।

87cd

कीदृशं नाम विशेषणम्। अत आह—स्वबुद्ध्येति। यद्धि स्वाकारेण विशेष्यमवभासयति, तद्विशेषणम् उत्पलादीनामिव नीलादि। न चावस्तुरूपो ऽपोहो वस्तुभूतमर्थं स्वाकारेणानुरञ्जयतीति न तस्य विशेषणम्। अतो न विशिष्टवाच्यतेत्यभिप्राय इति।

88

अपि च विशिष्टार्थाभिधाने नागृहीतविशेषणविशेष्ये बुद्धिरिति विशेषणाभिधानं प्रथमतरमापतति। न चाश्वादयः शब्दा अपोहबोधं

---

**1 कथं वेति** ] $A_1G_1S_1$ ; **कथं वा परिकल्प्येत संबन्धो वस्त्ववस्तुनोः** $K_1$ **3 किं चायम॰** ] $A_1G_1S_1$ ; **किञ्चैवम॰** $K_1$ **3 वा तद्विशिष्टो** ] $A_1G_1K_1$ ; **विशिष्टो** $S_1$ **4 तत्रापोह॰** ] $A_1G_1$ ; **तत्रापोहमात्र॰** $K_1S_1$ **4 ॰वाच्यत्वे** ] $A_1G_1S_1$ ; **॰वाच्यत्वपक्षे** $K_1$ **4 वक्ष्यते** ] $G_1K_1S_1$ ; **वक्ष्येत** $A_1$ **5 ॰तद्वतोरस्ति** ] $K_1S_1$ ; **॰तद्वतोस्ति** $A_1G_1$ **6 चान्तरेणैव** ] $A_1G_1S_1$ ; **चान्तरेण** $K_1$ **6 ॰सत्ता॰** ] $A_1G_1S_1$ ; **॰सत्व॰** $K_1$ **6 किंचित्कस्यचिद्** ] $A_1G_1S_1$ ; **कस्यचित् किञ्चित्** $K_1$ **7 संभवतीति न विशिष्टस्याभिधानं संभवती॰** ] $A_1G_1$ ; **भवतीति न विशिष्टाभिधानं संभवती॰** $K_1$ ; **भवती॰** $S_1$(eyeskip) **8 स्वरूपेति** ] $A_1G_1S_1$ ; **स्वरूपसत्वमात्रेण न च किञ्चिद्विशेषणम्** $K_1$ **10 स्वबुद्ध्येति** ] $A_1G_1S_1$ ; **स्वबुद्ध्या रज्यते येन विशेष्यन्तद्विशेषणम्** $K_1$ **10 यद्धि** ] $A_1G_1K_1$ ; **यदि** $S_1$ **10 स्वाकारेण** ] $A_1G_1S_1$ ; **स्वकारेण** $K_1$ **12 ऽपोहो** ] $A_1G_1S_1$ ; **पोह** $K_1$ **12 स्वाकारेणा॰** ] $A_1G_1K_1$ ; **स्वप्रकारेणा॰** $S_1$ **15 विशिष्टार्था॰** ] $A_1G_1K_1$ ; **विशिष्टा॰** $S_1$ **15 ॰विशेषण॰** ] $A_1G_1S_1$ ; **॰विशेषणा॰** $K_1$

जनयन्ति प्रागेव प्रथमम्। अतो न विशिष्टाभिधानं संभवतीत्यर्थाभिप्रायेणाह—न चेति।

89ab

स्यादेतत्। अपोहरूपमेव विशेषणं वस्त्वात्मना विशेष्यं प्रतिपादयिष्यतीति। तन्न, अन्यरूपस्य विशेषणस्यान्यादृशज्ञानाधानासामर्थ्यादित्याह—न चेति। अन्यरूपं विशेषणमन्यादृशं ज्ञानं न करोतीत्यर्थः।

89cd

अन्यादृशे वा ज्ञाने ऽन्यादृशं वस्तु विशेषणमेव न भवतीत्याह—कथमिति।

90

यदि त्वन्यादृशे ऽपि विशेष्ये ऽवसीयमाने ऽन्यादृशं विशेषणमुच्यते, तथा सर्वं सर्वस्य विशेषणं भवेदित्याह—अथेति।

91ab

यदि त्वपोहविशेषणानुरूपमेवासाधारणं वस्त्ववसीयते, एवं सत्य-

---

**2** °तीत्यर्था° ] $A_1G_1K_1$; °तीत्य° $S_1$ **2** न चेति ] $A_1G_1S_1$; न चाप्यश्वादिशब्देभ्यो जायते पोहबोधनम् विशेष्यबुद्धिरिष्टेह न चाज्ञातविशेषणा $K_1$ **5** प्रतिपादयिष्यतीति ] $A_1G_1S_1$; प्रतिपादयतीति $K_1$ **5** विशेषणस्या° ] $A_1G_1K_1$; विशेषणं ना° $S_1$ **6** न चेति ] $A_1G_1S_1$; न चान्यरूपमन्यादृक् कुर्यात् ज्ञानं विशेषणम् $K_1$ **6** अन्यरूपं ] $A_1G_1K_1$; अन्यनिरूपणं $S_1$ **6** विशेषणमन्या° ] $A_1G_1K_1$; विशेषणं नान्या° $S_1$ **7** न करोती° ] $A_1G_1K_1$; करोती° $S_1$ **9** अन्यादृशे वा ] $A_1G_1K_1$; नान्यादृशे च $S_1$ **9** वस्तु ] $A_1G_1K_1$; वस्तु विस्तु $S_1$ **10** कथमिति ] $A_1G_1S_1$; कथञ्चान्यादृशे ज्ञाने तदुच्येत विशेषणम् $K_1$ **12** त्वन्यादृशे ऽपि ] $A_1G_1K_1$; त्वयथा° $S_1$ **12** °मुच्यते ] $A_1G_1$; °मुच्येत $K_1S_1$ **13** सर्वं ] $A_1G_1$; सति सर्व $K_1S_1$ **13** भवेदि° ] $A_1G_1$; भवती° $K_1S_1$ **13** अथेति ] $A_1G_1S_1$; अथान्यथा विशेष्ये पि स्याद्विशेषणकल्पना तथा सति च यत् किञ्चित् प्रसज्येत विशेषणम् $K_1$ **15** °साधारणं ] $A_1G_1K_1$; °साधारणां $S_1$ **15** वस्त्ववसीयते ] $A_1G_1$; वस्त्ववसीयेत $K_1$; वस्त्वाश्रीयते $S_1$

भावरूपगम्यं तदपि न वस्तु स्यादित्याह—अभावेति।

91cd

अतः सिद्धं नापोहविशिष्टः शब्दार्थ इति। उपसंहरति—विशेषितमिति।

92

स्यादेतत्। यथावस्तुस्वभावमेव शब्दा वर्तितुमर्हन्ति, अन्यथावृत्तावर्थासंस्पर्शित्वापातात्। वस्तूनि चेतरेतरव्यावृत्तस्वभावान्येव सर्वाणीति शब्दैरपि तथैव दर्शयितुमुचितानि, एवं लिङ्गेनापि। अतोऽवश्यं व्यावृत्तिमुखेनैव शब्दलिङ्गयोर्वृत्तिराश्रयणीयेति।

अत आह—यद्यपीति। अयमभिप्रायः। यद्धि शब्दादुच्चरितादवगम्यते, स शब्दार्थः। शब्दाच्च बोधो लिङ्गाद्वा वस्त्वालम्बन एव जायते, नावस्तुविषयः। वस्तुतस्तद्वस्त्वस्तु नामान्यतो व्यावृत्तम्। न हि यावान् वस्तुनः स्वभावः स सर्वः शब्देनाभिधातव्य इति नियमहेतुरस्ति।

93ab

यद्यप्यपोहनिर्मुक्ते ऽर्थे शब्दलिङ्गयोर्वृत्तिरयुक्ता तथाविधार्थासंभवात्,

---

**1 स्यादित्याह** ] $A_1G_1K_1$; स्यादत आह $S_1$ **1 अभावेति** ] $A_1G_1S_1$; अभावरूपगम्ये च न विशेष्ये स्ति वस्तुता $K_1$ **4 विशेषितमिति** ] $A_1G_1S_1$; विशेषितमपोहेन वस्तु वाच्यन्न ते स्त्यतः $K_1$ **6 शब्दा** ] $A_1G_1K_1$; om. $S_1$ **7 °संस्पर्शित्वा°** ] $A_1G_1K_1$; °संस्पर्शिता° $S_1$ **7 वस्तूनि** ] $K_1$; वस्तुनि $A_1G_1S_1$ **8 शब्दैरपि** ] $A_1G_1K_1$; शब्दैरपीति $S_1$ **9 °योर्वृत्ति°** ] $A_1G_1K_1$; °योर्व्यावृत्ति° $S_1$ **10 यद्यपीति** ] $A_1G_1S_1$; यद्यप्यपोहनिर्मुक्ते न वृत्तिः शब्दलिंगयोः युक्ता तथापि बोधस्तु ज्ञातुर्वस्त्ववलंबते $K_1$ **10 शब्दा°** ] $A_1G_1K_1$; सब्दा° $S_1$ **11 शब्दाच्च** ] $A_1G_1$; शब्दाच्च जायमानो $K_1$; शब्दार्थ° $S_1$ **11 बोधो** ] $A_1G_1K_1$; बोधो जायमानो $S_1$ **11 लिङ्गाद्वा** ] $A_1G_1K_1$; लिङ्गाद् $S_1$ **11 °लम्बन एव** ] $A_1G_1K_1$; °लंबनमेव $S_1$ **12 वस्तुतस्तद्वस्त्वस्तु** ] $A_1G_1K_1$; वस्तुतस्तद्वस्तु $S_1$ **13 स सर्वः** ] $A_1G_1K_1$; स $S_1$ **16 यद्यप्यपोह°** ] $A_1G_1$; अतो यद्यपोह° $K_1$; अतो यद्यपि अन्यापोह° $S_1$ **16 शब्दलिङ्ग°** ] $A_1G_1K_1$; लिङ्गशब्द° $S_1$

तथापि शाब्दो बोधो वस्त्वालम्बते, तथा व्युत्पत्तेः। अर्थस्तु भवतु नामान्यापोहविशिष्टः, असंकीर्णस्वभावत्वाद् भावानाम्। अतो वस्त्वाकारसामान्यविशिष्टे शब्दादर्थे ऽवसीयमाने न कथंचिदपोहविशिष्टस्य शब्दवाच्यत्वम्।

न चैवमर्थासंस्पर्शिता। भावाभावात्मकं हि तद्वस्तु। तत्र कश्चिदेव शब्दः किंचिदेव वस्तुरूपं स्पृशति, न सर्वः सर्वम्, शक्तिवैचित्र्यादिति नार्थासंस्पर्शितेति।

स्यादेतत्। अस्तु वस्त्ववलम्बनः, स त्वसाधारणविषयो न सामान्यं गोचरयति। असाधारणं हि तत्र वस्तु न सामान्यमिति।

तन्न, तस्य शब्दाद् बुद्धावविपरिवृत्तेः। अनुगतं हि रूपमस्माकं शब्दादाभासते, नासाधारणो ऽर्थः। अतः सामान्यमेव वस्तुरूपं शब्दार्थ इत्यभिप्रायेणाह—न चेति।

93cd

निर्विकल्पं चासाधारणं वस्तु कथं तच्छाब्दे ज्ञाने विशेष्यतयावसीयत इत्याह—न चेति।

---

**1 वस्त्वा॰** ] $A_1G_1K_1$; वस्त्वेवा॰ $S_1$ **1 अर्थस्तु** ] $A_1G_1$; अर्थतस्तु $K_1$; अवस्तु $S_1$ **3 ॰सामान्य॰** ] $A_1G_1K_1$; om. $S_1$ **3 शब्दादर्थे** ] $A_1G_1K_1$; शब्दार्थे $S_1$ **6 वस्तुरूपं** ] $A_1G_1$; वस्तु $K_1$; रूपं $S_1$ **7 ॰दिति ना॰** ] $K_1$; ॰दिति नात्रा॰ $A_1G_1$; ॰दिका॰ $S_1$ **7 ॰स्पर्शितेति** ] $A_1G_1K_1$; ॰स्पर्शिता $S_1$ **8 अस्तु** ] $K_1S_1$; अवस्तु $A_1G_1$ **8 वस्त्ववलम्बनः** ] $K_1$; वस्तूपलंभः $A_1G_1$; वस्त्वालम्बनम् $S_1$ **8 स त्व॰** ] $A_1G_1K_1$; तत्व॰ $S_1$ **8 ॰विषयो** ] $A_1G_1K_1$; ॰विषयं $S_1$ **9 हि** ] $A_1G_1K_1$; om. $S_1$ **9 तत्र** ] $A_1G_1S_1$; तद् $K_1$ **10 तस्य** ] $A_1G_1K_1$; तत्र $S_1$ **10 शब्दाद् बुद्धाव॰** ] em.; शब्दाद्बुद्धावपि परिवृत्तेः $A_1G_1$; बुद्धौ शब्दाद॰ $K_1$; शाब्द्या बुध्या॰ $S_1$ **11 ॰दाभासते** ] $A_1G_1S_1$; ॰त् भासते $K_1$ **11 सामान्यमेव वस्तुरूपं** ] $A_1G_1K_1$; सामान्यमेकं रूपं $S_1$ **12 शब्दार्थ इत्य॰** ] $A_1G_1K_1$; शब्दार्थस्येत्य॰ $S_1$ **12 न चेति** ] $A_1G_1S_1$; न चासाधारणं वस्तु बुद्धौ विपरिवर्तते $K_1$ **14 निर्विकल्पं चा॰** ] $A_1G_1S_1$; निर्विकल्पकञ्चा॰ $K_1$ **14 तच्छाब्दे ज्ञाने** ] $A_1G_1K_1$; तच्छब्दाज्ञाने $S_1$ **15 न चेति** ] $A_1G_1S_1$; न चापि निर्विकल्पकत्वात्तस्य युक्ताभिधेयता $K_1^{ac}$(unmetrical); न चापि निर्विकल्पत्वात्तस्य युक्ताभिधेयता $K_1^{pc}$

94ab

यदि त्वनवगम्यमानमेव शब्दात्तदपोहस्य विशेष्यमिष्यते, तदति-साहसमित्याह—शब्देनेति।

94cd

अतो वस्त्वात्मकमेव सामान्यं गवादिशब्दप्रत्यययोरालम्बनमित्याह—तेनेति।

**2** **शब्दात्तद॰** ] $K_1$; **शब्दात्तदेवा॰** $A_1G_1S_1$ **3** **॰साहसमित्याह** ] $K_1$; **॰साह-समेवेत्याह** $A_1G_1S_1$ **3** **शब्देनेति** ] $A_1G_1S_1$; **शब्देनागम्यमानञ्च विशेष्यमिति साहसम्** $K_1$ **5** **गवादिशब्द॰** ] $A_1G_1K_1$; **गवादिप्रयोग॰** $S_1$ **6** **तेनेति** ] $A_1G_1S_1$; **तेन सामान्यमेष्टव्यं विषयो शब्दबुद्धिशब्दयोः** $K_1^{ac}$(unmetrical); **तेन सामान्यमेष्टव्यं विषयो बुद्धिशब्दयोः** $K_1^{pc}$